सटीकं
कबीरदासशतकम्

लेखकः

डॉ परड्डी मल्लिकार्जुनः, एम्.ए., पिएच्.डी.

प्रकाशक :

श्री जगद्गुरु-गङ्गाधर-धर्मप्रचारक मण्डलम्

मूरुसाविरमठः, हुब्बली-५८०००२०

१९८८

श्री जगद्गुरु मूरुसाविरमठीय ग्रन्थमाला–२७९

सटीकं
कबीरदासशतकम्

लेखकः

डॉ परड्डी मल्लिकार्जुनः, एम्.ए., पिएच्.डी.,
साहित्यरत्नम्
कर्णाटकविश्वविद्यालय संस्कृतविभागः
धारवाड-५८०००३

प्रकाशक :

श्री जगद्गुरु गङ्गाधर-धर्मप्रचारक मण्डलम्
मूरुसाविरमठः, हुब्बली–५४०००२०
१९८४

Satikam Kabīradāsaśatakam by
Dr. Paraddi Mallikarjun
Department of Sanskrit,
Karnatak University, Dharwad—580 003

Published by :
Sri Jagadguru Gangadhara Dharma Pracaraka Mandala. Moorusaviramatha, Hubli–5800020
Karnataka State [India]

© Author

First Eddition : February, 1988
Copies : 1000

Price : Rs. Fifteen only (15/—)

Printer :
Sadanand Pawar
Sadanand Printers, Old Dalal Market,
Dharwad–580001

परमपूज्यानां हुब्बली मूरुसाविर मठाध्यक्षाणां
श्रीमन्महाराज-निरञ्जन-जगद्गुरुवर्याणां
श्री गङ्गाधरराजयोगीन्द्रमहास्वामिनां
आशीर्वचनम्

नाना धार्मिक दार्शनिक परम्परासम्पन्नेऽस्मिन् भारतदेशे काले काले समुद्भूता महात्मनः समाजं च्युतिमात्मोन्नतिं च प्रति दत्तचित्ताः दुर्वृत्तप्रवृत्तानामुपदेशे कृतपरिश्रमाः श्रूयन्ते। धार्मिकादिकुरीतीनामाषाढभूतीनां च विडम्बना यथावकाशं कुर्वन्तः परोपकारव्रतधारिणः संदृश्यन्ते। त्यक्तस्वार्थानां तेषामुदारं चरितानां कृते समग्रा वसुधैव कुटुम्बकमिति लोकानुभवो विद्यते। तेषु विरलेषु सत्पुरुषेषु कबीरदासोऽपि गण्यते। इस्लामधर्मं जातेन तेन भारतीयाध्यात्मविद्यामात्मसात्कृत्वा जनजागृतिं कर्तुकामः समाजे वर्तमानमैढ्योपहासं करोति। कुमार्गप्रस्थितं विवेकहीनं न कमपि पुरुषं न विडम्बयति।

तस्यविचारधारा कर्णाटकलब्धजन्मनां शिवशरणानां हरिदासानां च योगिनां वेदान्तिनां च विचारानुसारामेव वर्तत इति तदीयग्रन्थावलोकनेन सुस्पष्टं भवति। दोहाछन्दसि हिन्दीभाषयां रचितानां तस्य पद्यनां जनप्रियता नीतिबोधक्षमता चोपमातीते इति शक्यं वक्तुम्।

तस्यैव कबीरदासस्य दोहाशतकस्य संस्कृतपद्यानुवादं कुर्वता डॉ पट्टडी मल्लिकार्जुनेन सारस्वतो लोकोऽयं दृढमुपकृत इतिमन्यामहे। एवमेवास्य साहित्यसेवा चिरं प्रवर्तंतां, यदर्थं कर्ता श्री जगद्गुरु गुरुसिद्धेश्वराऽनन्तायुरारोग्यसंपदा संयोजयत्वेनमिति आशास्महे। अन्तत एतद्ग्रन्थप्रकाशनकार्ये प्रत्यक्षं परोक्षं वा येऽपि सहायमकुर्वन् तान् सर्वानपि श्री जगद्गुरु रक्षादिति भणित्वा विरमामः।

इति शिवम्

विषयानुक्रमणिका

आशीर्वचनम्	
आमुखम्	1—10
सटीक कबीरदासशतकम्	१-६७
कबीरदोहाशतम्	६९-८०
अनुबन्धः	८१
श्लोकानुक्रमणिका	८३-८५
दोहानुक्रमणिका	८६-८८

आमुखम्

आत्मा त्वं गिरिजा मतिः परिजनाः प्राणाः शरीरं गृहं
पूजा ते विषयोपभोगरचना निद्रा समाधिः स्थितिः ।
सञ्चारः पदयोः प्रदक्षिणविधिः स्तोत्राणि सर्वा गिरः
यद्यत् कर्म करोमि तत्तदखिलं शम्भो ! तवाराधनम् ॥

वेदान्ताभिधानमाजामुपनिषदां दर्शने परब्रह्मणो या ज्ञानोपासनासीत् सैव क्रमेण सगुणोपासनारूपेण भक्तिरूपेण वा परिणतेति भारतीयदर्शनविदामभिप्रायः । यद्यपि गीतायामुक्तम् अव्यक्ता हि गतिर्दुःख देहवद्भिरवाप्यते । इति, तथापि मूर्तिपूजा परनामभाक् सगुणोपासना साधनमात्रमूता साध्यरूपेण गृहीता कालान्तरेण, येन धार्मिककलहानामानन्त्यं समुत्पन्नम् । उच्यते अत्र

सगुणोपासना लोके
देवदर्शनसाधनम् ।
सैव साध्यत्वरूपेण
दाम्भिकैः जीविकाकृता ॥

अन्धविश्वासा अस्या एव मूर्तिपूजायाः पुत्रत्वेन गृहीतुं शक्यन्ते । सगुणोपासनद्वारा दृढीकृता भगवद्विषयकरतिः निर्गुणोपासना

रूपेण यदा परिणमति, तदा परमात्मदर्शनं तेनानन्दानुभूतिः सम्भवति ।

अत एव यद्यपि कबीरदासोऽध्यात्ममार्गे भक्तेरुपयोगं मनोति, तथापि ज्ञानविहीनभक्तिरन्धविश्वासतां भजते, येन साधकः प्रगतिपथाद् दूर एव वर्तते ।

येनेश्वप्राप्तिरिति ब्रुवन्ति
तेनैव दूरीक्रियते कदाचित् ।
अनन्तबाहुस्मरणेन दिव्या
भवेदनन्तस्य सुखानुभूतिः ॥

एतच्छतकान्तर्गतश्लोकमध्ये कतिपयाः श्लोका अन्धविश्वास परिहासपूर्णा दृश्यन्ते । उदाहरणार्थ–

शिरोमुण्डनमात्रेण
हरिर्लभ्यो यदा नरैः ।
भूयो मुण्डनमापन्नो
मेषो वैकुण्ठमेति किम् ॥

शतकेऽस्मिन्ननूदिता दोहा नामानः श्लोका नीतिवैराग्यज्ञानादि–विषयपरा वर्तन्त इति तेषामवलोकनेन सुस्पष्टं भवति । हिन्दीपरीक्षा नियुक्तं कबीरदोहावलीग्रन्थपठनप्रभावितोऽहं कतिपयदोहानामनुवादे मतिमकरवम् । तन्मतेः सफलीकरणं मधुना कबीरदासशतक प्रकाशनेन भूतमिति सामोदं सविनयं च निवेद्यते । अत्रैतदपि स्मर्तव्यं यत् कबीरदासपूर्वं पश्चान् च

कर्णाटकदेशे शिवशरणैः हरिदासैश्च धार्मिकडम्भाचार सामाजिक कुरनुसृतःयदि खण्डनं कृत्वोपनिषद्दर्शनरीत्येन भगवद्दर्शनोपायोऽ

कविपरिचय

ये साधवो निजहितादपि लोकलाभं
कार्यं भवेदिति निरन्तरमेव मत्वा ।
पूताः स्वयं परहितामिततुष्टचित्ताः
कुर्वन्ति गोपनमहो निजजीवितस्य : १ :।

ये चालाः पवुद्धिविभवा। समया भवाब्दे-
रात्म·तवैः पटुतराः कृतपुण्यलेशा ।
भूयोऽपि साधुसुगुणा निवगण्यवाद्
यान्त्येव·हास्यपदवीं मदवीतलज्जा : :। २ :।

तेष्वेव पुण्यपुरुषो गणितः कवीरः
यस्याभिधानमधुनः सदनं सुकीर्तेः ।
येन प्रमादजनितो जनताविकारो
ज्ञानाग्निना भवति दग्ध इह प्रमोदात् :। ३ :।

तस्य प्रसिद्धकवितावलितो यदल्प
लब्धं तु जीवनकलाचरितं विरक्तम् ।
यद्वा विमर्शकगणैर्गणितं प्रमाणं
तेनैव वर्णनपरो भवितामहमद्य :। ४ :।

यावत्स जीवति महापुरुषो विरक्तः
मौनाश्रयं च कुरुते निजवर्णनेऽत्र ।
मृत्युर्यदा भवति भक्तगणे तदीये
दैवीस्थितिप्रचुरता भविता तदास्य ॥५॥

ग्रन्थे कबीरवचनं भवतारणाख्ये [1]
ख्यातो युगेषु यदहं विविधाभिधानैः [2]
अद्यापि मोहरहितः सहितः प्रभावैः
वासं करोमि विरलैः सह योगिराजैः ॥ ३ ॥

हिन्दीनिबद्धचरिते [3] लिखितः सुमान्यैः
विद्वद्भिरेव कविपुङ्गवजन्मकालः । [4]
तद् भक्तमाल [5] रचनावचनानुसारं
आदर्शवान् गुणविभूषितसर्ववृत्तः ॥ ७ ॥

---

1 ग्रन्थभवतारणे

2 कृतयुगे सत्सुकृतनाम्ना त्रेतायुगे मुनीन्द्रामिधानेन द्वापरे कुरु नामधेयेन कलौ च कबीरामिधानेन ख्यातोहमिति कबीरमुखादेव निर्गता वाणीति मन्यते ॥

3 कबीरचरित बोधनामि ग्रन्थे ।

4 केषांचनविदुषां मते कबीरजन्मतिथिः ख्रिस्ताब्धस्य 1398 तमे वर्षे इलरेषां च मते 1399 वर्षेऽभवत् । किन्तु सिकन्दर लोदी समकालीनतया 1485-1517 पर्यन्त कालावधेः जीवितमस्येति कथितुं शक्यते ।

5 साम्प्रादासकृतः भक्त माल नामा ग्रन्थः।

सोऽनतन्त रामरचिते रुचिरेऽपि काव्ये [6]
इत्थं प्रशंसनपदं भविता कबीरः ।
काशीकुविन्द [7] इति गौरवपात्रमासीत्
सौभाग्यतो गुरुवरं [8] गत एषसाधुः ॥ ८ ॥

श्री वीरसिंहनृपतेः समकालवासः [9]
शारहः सिकन्दर [10] इमं बहु बाधते स्म ।
विंशाधिके शततमे वयसि प्रमीतः [11]
एषा कबीरविषये घटनावलिः स्यात् ॥ ९ ॥

जन्मादि तस्य 'मगहर्' नगरे परन्तु
तत्सन्निधिं ह्यभिलषन् गत एव काशीम् ।[12]
यस्यां कुविन्दरिषद्यपि जन्मलेभे
इस्लामधर्मिकविधेरनु तदासीत्गा ॥ १० ॥

---

6 श्री कबीरदासजी की परिचइ नाम्नि ग्रन्थे ।
7 कासी बसै जुलाहा एक ।
8 भागबडै रामानन्द गुरु पाया ।
9 वीरसिन्घदे बंघेलौ राजा ।
कबीर कासी सोइ लाजा ।
10 ख्यात सिकन्दर कासी आया काजी मुलां के मति भाया ।
बाध्यौ पग मेल्हों जंजीर, लें बोर्यो गंगा कै नीरु ।।
11 बालकपनौ धोखा में गयौ । बीस बरस ते चेतन भयौं ।
बरस सड सभकीनी भगति । ना पीछे पाईतेमुक्ती ।
12 पहले दरसन मगहर पायो,सेा पुति कासी बसे बाई ।।

लोकश्रुतेरयमभूत् कमलाकराप्त-
जन्मा[13] पुनः कमलयोनिसमप्रभावः ।
या विप्रजातिविधवा गुरुसुप्रसादात्[14]

प्रासूत सैव करतो करवीरनामा ॥ ११ ॥
मात्रा तु रामरतिरप्य विनिन्दिताभूत्[15]
पित्राभिनान्दित इति प्रतिभाति सोऽयम् ।[16]
इत्थं मतीयकलहात् गतविभ्रमोऽसौ
काशीपुरे वसति साधुजनाश्रयेऽस्मिन् ॥ १२ ॥

वैवाहिकी स्थितिरियं कविनैकपद्यै[17]
आविष्कृता भवति किन्तु कलत्रदोषः ।
यद्वैकवारमर्थवा भवति द्विवारं
पाणिग्रहोऽस्य विषये नहि निश्चयोऽस्ति[18] ॥ १३ ॥

---

13 कबीरपथानुगैरुच्यते — अयं लहरतारा नाम्नि कमलाकरे कमलपत्र एव जात् इति ।

14 यथा कुन्ती दुर्वासं वरप्रभावात् कर्णं ससोतः कर्णमसूत तथैव रामानन्द गुरोः वरप्रभावात् विधवा ब्राह्मणी काचित्कतो ह्येनं प्रासूत । कलङ्कभीत्या तदा तत्रैव त्यक्तः नीरु नीमाल दम्पतीभ्यां लब्धः पुत्रवच्च पालितः ।

15 कबीर (करवीर) नाम करोत्पन्नतयास्य प्रसिद्धम् ।

16 मात्रा रुदितमिदं- हमारे कुल कौनें रामकह्यौ ॥

17 इयं कबीरोक्तिः- नारातो हम भी करी जाना नहीं विचार ।
जब जाना तब परिहरी सारी बडा विकार ॥

18 कबीरनामत्रयम्— लोई, धसिया तथा रामजनिया ।

तत्सन्ततिद्वयमिदं कलिनं म्वयं च
पुत्रः पुनः सगुणभक्तियुतः कमालः ।
येन व्यथा भजति साधुकबीरदासः19
तोष पितुः कृतवती तनया कमाली ।।20

अस्पृश्यजातिजननाज्जनतोपहास-
पात्रं न कोऽपि गणयत्यधुना कबीरम् ।
रामादिरस्य कुरुते गणनां श्रुतज्ञो
नन्दो20 गुरुः स्तवनपात्रमभूत्कवेर्यः ।। १५ ।।

अस्यौर्ध्वदैहिकभूत्कथमित्यसाध्यं
वक्तुं विवादमयता ह्याभवत्तदानीम् ।
हिन्दूविधेश्च दहनं नहि, तत्समाधि-
रिस्लामधर्मविधिना नहि शक्यतेऽस्य
पुष्पावलीभवतितस्यशरीरमेव ! ।। १६ ।।

बाह्यप्रमाणरचितं चरितं कवेर्यत्
सन्निधमेव सकलं प्रबला हि शङ्का ।
आभ्यन्तरं यदि विलोकयते स विद्वान्
यश्चारुचित्रणमहो कुरुते कवेस्तत् ।। १७ ।।

---

19 कबीर एवं वदति :- बूडा वंश कबीर का उपजा पूत कमाल ।
20 रामादिर्नन्दः = रामानन्दः अस्य गुरोर्नाम ।

सा भारतीयजनता विविधप्रकारै
राडम्बरैर्बहुविधैः कुविचारजालैः ।
पूर्णाप्यपूर्णहृपया विषयाग्निदग्धा
निर्वीर्यतादिविफलबिकलीक्रमैश्च ॥ १८ ॥

रामोऽपि हिन्दुजनतापरिपूजितः सन्
इस्लामबान्धवगणादरपात्रमल्ला ।
यावत्तयोरगुणरूप[21] विशिष्टता स्यात्
तावत्तयोर्भवति नूनमभेदबुद्धिः ॥ १९ ॥

ज्ञानं विना भवति भक्तिपथोऽफलश्च
ज्ञानं सुभक्तिरहितं भविता हि शुष्कम् ।
तस्मात्तयोर्विमलसङ्गमजातहर्षः
क्षीराब्धिहंस इव सज्जनसङ्गतोषः ॥ २० ॥

लोकेऽपि यत्परिचयाद्रतिसम्भवोऽस्ति
ईशाद्भुतस्थितिविदां रतिसम्भवः स्यात् ।
ईशः प्रियः प्रियतमा सकलाश्च जीवाः
तत्त्वद्वयेऽद्वयतिः[22] खलु भक्तिहेतुः ॥ २१ ॥

योगे रतिः शिवनुतिः सरला च वृत्तिः
भोगेऽरतिः सुगुणजालरतिः सुतुष्टिः ।
सूफीमते परिचितिः विरतिः कुमार्गे
दोषैकदूषण विधिः कविचित्रमेतत् ॥ २२ ॥

---

21 निर्गुणरूप० 22 अद्वैतमतिः

सर्वत्र यो वसति शासरहीमनामा
तद्बन्धनं न मसजिद् भवनेषु शक्यम् ।
देवालये यदि समीक्षितुमस्ति कांक्षा
स्वां जीविकां प्रति पुनः कृतबुद्धिरेषः ॥ २३ ॥

बुद्धो जिनो बसव इत्यपि साधुवर्गः
लोकप्रयुक्तवचसा हतचित्ततापः ।
तद्वत् कबीरवचनैः जनतासमूह
उच्चैः स्थितिं प्रतिसमाहितचित्त आसीत् ॥ २४ ॥

वाणी निसर्गसहजा ह्यपि काव्यधर्मैः
युक्तोपपत्तिसहिता सहिता जनस्य ।
सालङ्कृतिर्ध्वनिमयीसरला सदैव
चेतोहरेश्वररता च विरक्तियुक्ता ॥ २५ ॥

लोके भवन्ति विरला सरला हि सन्तः
भिन्नप्रदेशजननादपि कालभेदात् ।
शास्त्रेषु नीतिविषये च समानचित्ताः
तेषां सतां भवति तुल्यमनःप्रवृत्तिः ॥ २६ ॥

श्री[23]वल्लवर कविवरो[24] पुरुषार्थबोधे
भक्तेर्महत्वमतुलं विवृणोति यद्वत् ।
ज्ञानादिवर्णनपरोऽपि सुभक्तिमौल्यं
जानाति वर्णयति वा बहुधा कबीरः ॥ २७ ॥

---

23 श्री = तिरुआय्मामायाम् ।

24 तिरुकुरल् नामास्य तदाख्यवृत्तरचितः काव्यग्रन्थो लोकप्रसिद्धः ।

भक्ताग्रणीः विरतपुङ्गवनाभदेवः
एकेश्वरं प्रति यथाहितचित्तवृत्तिः ।
जात्यादिखण्डनपरोऽभवदेवभेव
साधुः सदा विरतिभक्तिमयः कबीरः ॥ २८ ॥

कर्णाटवाग्रचितनीतिकवित्वकीर्तिः
सर्वज्ञ इत्यपि जनेषु यथार्थनामा ।
स्वीये त्रिपादरचिते[25] कवितागणे यो
लोकोपदेशकुशलश्च यथा कबीरः ॥ २९ ॥

अन्योऽपि साधुनिचयो निचये जनानां
वेमादिनीतिकुशलैः सहितो हितेच्छुः ।
यं यं च मार्गमनुसृत्य कृतोपकारः
तेनैव लोकहितमिच्छति नः कबीरः ॥ ३० ॥

---

25 त्रिपदीति कन्नड छन्दोनाम ।

सटीकं कबीरदासशतकम् ।

सनातनं ब्रह्म निरञ्जनं द्रु:
गुणान्वितं ब्रह्म तदीयशाखा ।
देवत्रयं तस्य भवेत्प्रशाखा
सर्वं जगत्पत्रचयस्तदीय: ॥ १ ॥

टीका–सनातनं ब्रह्म अक्षयपुरुष: पुरुषोत्तम इति गीतोक्त: परमात्मा 'बहु:स्याम्' इति नानारूपेषु प्रकटयत्यात्मानम् । मूर्तं सगुण वा तद् ब्रह्मामूर्तब्रह्मरूपिणो वृक्षस्य शारवा भवति, पुनश्च ब्रह्मा विष्णुर्महेशश्चेति त्रिमूर्तय: प्रशाखा भवन्ति । सर्वमिदं जगत् पत्रचय चेति मन्तव्यम्। अर्थात् जगदिदं ब्रह्माभिन्न-मस्तीति वदता सर्वं खल्विदं ब्रह्मेति वेदान्ताभिप्राय: कबीर-दासेन संसूचित: । यदुक्तं–

उत्तम:पुरुषस्त्वन्य: परमात्मेत्युदाहृत: ।
यो लोकत्रयमाविश्य बिभर्त्यव्ययमीश्वर: ॥
(गीता xv 17)

तत्रैव पुरुषोत्तमव्याख्यापि कृता–
यस्मात् क्षरमतीतोऽहमक्षरादपि चोत्तम: ।
अतोऽस्मि लेके वेदे च प्रथित:पुरुषोत्तम: ॥
(गीता xv 18)

ब्रह्मादीनां परब्रह्मणो विकारतेत्थं निरूपिता–
ब्रह्मादिषु प्रलीनेषु नष्टे लोके चराचरे।
एकस्तिष्ठति विश्वात्मा स मे विष्णुः प्रसीदतु ॥

गीतायामेवोक्ताश्वत्थवृक्षकल्पनापि स्मर्तव्या (xv 1)। सूफीमतानुसारमपि परमात्मैव सर्वेषां मूलस्रोतोऽस्ति। कबीरदासानुभूतिविषये चैतदवधार्यतां यत् ज्ञानयोगः भक्तियोगपुष्टो भवति। रूपकालङ्कारोदाहरणमेतत्।

न तस्य वक्त्रं न तु मस्तकं वा
न वा कुरूपं न तु सुन्दरं तत्।
पुष्पेऽस्ति यो गन्धगुणोऽतिसूक्ष्मः
तस्मादिदं सूक्ष्मतरं हि तत्त्वम् ॥ २ ॥

न तस्येति वदता निर्गुणं परमं ब्रह्मेति सुष्टु भणितं कविना। अश्वत्थवृक्षवर्णनोक्तश्लोकपूर्वार्धमेतदेव विवृणोति। यथा–

न रूपमस्येह तथोपलभ्यते
नान्तो न चादिर्न च संप्रतिष्ठा॥ (गीता xv 3)

पुष्पे वर्तमानस्य गन्धगुणस्योपमया परमात्मनो यन्निराकारत्वं सूचितं तदेव तत्पूर्वमेव कर्णाणकदेशीयशिवशरणस्य बसवेश्वरस्य सूक्त्या सम्यक् साधितम्। यथा–

यथा जलेऽग्निर्ननु सस्यगुप्ता
रुचिर्यथा पुष्पचये सुगन्धः ।
भवद्गतिः सङ्गमदेव ! मूले
कुलीनकन्याप्रणयो यथा स्यात् ॥

चतुर्भुजध्यानकृतार्थमूढा-
स्ते विस्मरन्त्येव परं महेशम् ।
कबीरदासोक्तिमिमां शृणुष्व-
मनन्तबाहुं स्मर देवदेवम् ॥ ३ ॥

सगुणोपासनं निर्गुणब्रह्मोपासनादपि सुलभमिति गीतायामुक्तं 'क्लेशोऽधिकतरस्तेषामव्यक्तासक्तचेतसाम् ।'

अव्यक्ता हि गतिर्दुःखं देहवद्भिरवाप्यते । (गीता xii 5) अत एव विश्वरूपविमूढात्मार्जुनः भगवन्तं प्रार्थयति- तेनैव रूपेणचतुर्भुजेन-

सहस्रबाहो भव विश्वमूर्ते ! (गीता xi 46) इति । तथापि अव्यक्तपरमात्मानुसन्धानमवश्यं करणीयमेव 'सहस्रशीर्षाः पुरुषः सहस्राक्षः सहस्रपात्' इत्यागमोक्तरीत्या परमात्मनोऽनन्त बाहुविशेषणपदद्वारा स्तुतिं करोति । गीतोक्तिरप्यत्र स्मर्तव्या-

अव्यक्तं व्यक्तिमापन्नं मन्यन्ते मामबुद्धयः ।
परं भावमजानन्तो मामव्ययमनुत्तमम् ॥ (vii 24)

गुणान्वितब्रह्मानुर्ति कुरु त्वं
ज्ञात्वा सुखी भूविगुण परं तत् ।
एतद्द्वयं त्यक्तवतो ममाद्य
निरञ्जनब्रह्मलयः सदैव ॥ ४ ॥

गुणन्वितब्रह्मणोऽथवा मार्गदर्शिसद्गुरोर्नुतिः सेवा वा प्रथमं कर्तव्या साधकैः । बन्धकारणं मोक्षोपायं च दर्शयन् गुरुः साधनमार्गेऽस्मिन् परमावश्यक इति सर्वैरपि मानितमेव । अस्मिन् विषये सर्वज्ञो नाम कर्णाटभाषाकविरपि ब्रवीति—

भोजनान्ते न तिष्ठन्ति बान्धवा इति कीर्तिताः ।
सर्वज्ञवचनं चात्र गुरुर्बन्धनतारकः ॥ इति ।

'गुरुर्ब्रह्मा गुरुर्विष्णुः गुरुःसाक्षान्महेश्वरः' इति यदुक्तं सुभाषितकारेण तदप्यत्र स्मरणीयम् । अध्यात्ममन्दिराधिरोहणे गुरुप्राप्तिः प्रथमसोपानम् । तदनन्तरं तन्मार्गदर्शन एव यमनियमाद्यष्टाङ्गयुतेन योगेनान्ततो परब्रह्मलयानुभूतिः क्रियतामिति मानवजीवितोद्देशं परमं निर्दिशति कबीरदासः ।

न तं जनःकोऽपि हिनस्ति लोके
करोति रक्षां प्रभुरेव यस्य ।
जगद्भवेद्यद्यपि तस्य शत्रुः
विनाशमायाति न तस्य किञ्चित् ॥ ५ ॥

'अरक्षितस्तिष्ठति दैवरक्षितः' इतिन्यायेन यावत्पर्यन्त-मीश्वरानुग्रहो वर्तते तावत्पर्यन्तं तस्य जन्तोः (न केवलं मानवस्य) हन्ता वापकर्ता वा न स्यात्। यतः-

रक्षको शिक्षको वापि
परमात्मैव कीर्तितः ॥

निजभक्तानामभयं यच्छन् परमात्मैव ब्रवीतिः-

अनन्याश्चिन्तयन्तो मां ये जनाः पर्युपासते।
तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यहम् ॥

(गीता ix 22)

वणिग्वरोऽयं सहजः प्रभुर्मे
यस्यास्ति शुद्धा व्यवहारबुद्धिः।
स तोलयत्येव विना तुलादिभिः
संसारमेवाखिलमात्मशक्त्या ॥ ६ ॥

परमात्मनो व्यवहारकुशलतां बसवेश्वरोऽपि स्वीय एकस्मिन् वचने दर्शयति। यथा-

आपणं तत्सङ्गमेश्वर ! ते धरायां वर्तते
त्वं पुनः श्रेष्ठो महान् मतिमानपेक्षितनीतिवान्।
लाभ इह हानिर्न भवतस्ते जनस्य विचित्रता
एकमानसवन्नरे व्यवहारकृन्नतु लाभवान् ॥

पक्षपातादिदोषदूरं तं कोऽपि न वञ्चयितुं समर्थ इति पद्यस्यास्य भावोऽवगन्तव्यः। रूपकालङ्कारः।

यथा सुगन्धःकुसुमाकरेऽस्ति
तथा त्वदङ्गे प्रभुरेकशक्तिः।
सुगन्धनाभिर्मृगजातिरेषा
तृणं यथा पश्यति यत्रकुत्र ॥ ७ ॥

ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति। (गीता xviii 16) इति गीतोक्त्यनुसारेण यःपरमात्मा सर्वव्यापी (omni-present) भवति स प्रत्येकपुरुषे नास्ति किम्? पुष्पे यथा गन्धगुणो गरीयान् तथैव हृद्देशे वर्तमानं तं परमात्मान द्रष्टुं सर्वत्र धावन् देही श्रान्तोऽविश्रान्तो भवति। मायापतचेताः स नरः सरलमेतत्सत्यं विस्मृतवानस्ति। यदुक्तं–

सर्वव्यापकं देवं द्रष्टुमिच्छन्ति ये नराः।
विहायात्मनिवासं तं भ्रमन्ति व्यथिता पुनः। इति।

कस्तूरीमृगस्तु स्वनाभौ वर्तमानां कस्तूरीमजानन् परत्रासौ वर्तते इति भ्रान्त्या धावन्नितस्ततस्तृणलाभेन तुष्टो भवति। तद्वदेवेश्वरान्वेषणे मानवस्यायं यत्नोऽपि व्यर्थं इत्युपमालङ्कारद्वारा स्पष्टीक्रियते।

अन्वेषणे यस्य जगद्भ्रमस्ते
शरीरवासी तव देवदेवः।
मायावृतो यावदयं हि लोके
ज्ञेयो न तावद्भवता महेशः ॥ ८ ॥

पूर्ववदत्रापि भ्रमन्तमज्ञानवशान्मानवमुद्दिश्य कबीरदासेन यथार्थ-स्थितिरत्र सुष्टु विशदीकृता। अत एव 'तमसो मा ज्योतिर्गमय' इत्यादिवैदिकप्रार्थना सार्थका दृश्यते। मल्हणस्तोत्रस्यैकं पद्य-मिदमेव प्रकारान्तरेण प्रकट यति। यथा–

अन्धस्य मे हृतविवेकमहाधनस्य
चोरैः प्रभो! बलिभिरिन्द्रियनामधेयैः।
संसारकूपकुहरे विनिपातितस्य
देवेश! देहि कृपणस्य करावलम्बम् ॥

नामास्य देवस्य मणिर्विशुद्धः
अशुद्धलोहो मनुजस्वभावः।
स्पर्शेण लोहो भविता सुवर्णः
मायामयं बन्धनमद्य नष्टम् ॥ ९ ॥

मलिनो यथा लोहः स्पर्शमणिप्रभावात्सुवर्णतां भजते, तथैव संसारकूपकुहरे विनिपातितोऽयं मानवः ईश्वरनामसंकीर्त-

नैन तेन प्राप्तेनेश्वरानुग्रहेण न केवलं शुध्दो भवति, भगवत्स्वरूप एव भवतीति साधकानामभिमतम्। एषोऽर्थः रूपकालङ्कारद्वारा साधु समर्थितोऽत्र। नामकीर्तनरूपा भगवद्भक्तिःनर नारायणरूपेण परिवर्तयितुं समर्थेति स्वयंवेद्यम्। यदीश्वरस्य भक्तियोगसुलभत्वं कविकुलगुरुणा कालिदासेन दर्शितं स्वीयविक्रमोर्वशीयनामके नाटके (I. I), तदेवाल्लमप्रभुनामधेयभाजा कर्णाटभाषाकविना शिवशरणेन सुष्टु साधितम्। यथा–

गङ्गानिमज्जनशतैर्न महत्सुमेरोः
सानौ च रोदनतया नतु शुध्दितो वा।
शुध्दप्रकाशशिवतत्त्वमिदं व्रतैर्न
लभ्यं गुहेश। मनसःसुसमाधियोगात्॥ इति।

नामास्ति रत्नं बहुमूल्यमद्य
सुरक्षितं तत् कुरुतात्मशक्त्या।
क्रेता न वा तस्य भवेन्न मूल्यं
परीक्षको नापि भवेद्धि लोके ॥ १० ॥

आत्मशक्त्या सुरक्षितं तत्कुरुतेत्यत्र मनश्चाञ्चल्येन विषयपरतयेन्द्रियाणां चेश्वरानुभूतिरशक्यप्रायेव लक्ष्यते। भगवन्नामविस्मृतिः भूयोऽपि मा भूदिति सङ्केतःक्रियतेऽत्र कबीरदासेन। एकवारमीश्वरानुभूतिसद्भावे यमनियमादिसाधनद्वारा मनोवैकल्यं यथा स्यात्तथा प्रयनेतेति गीतायामपि सुष्टूक्तम्। यथा–

यतो यतो निश्चरति मनश्चञ्चलमस्थिरम् ।
ततस्ततो नियम्येतदात्मन्येव वशं नयेत् । (vi 26)

यत्नलब्धधनादिकं हर्तुं बहवश्चोरा सन्तीति नैकानि निदर्शनानि सन्ति । बिल्हणोऽपि स्वीये विक्रमाङ्कदेवचरिते नाम्नि काव्ये वदति यथा–

साहित्यपाथोनिधिमन्थनोत्थं
काव्यामृतं रक्षत हे कवीन्द्राः ।
यदस्य दैत्या इव लुण्ठनाय
काव्यार्थचोरा बहुलाभवन्ति ॥

रसायने दत्तमतिर्मनोमि
नामादृते किञ्चिदपि ह्ययोज्यम् ।
अन्तःशरीरे चरतो यदल्पात्
तनुर्भवेत्स्वर्णमयी हि पूर्णा ॥ १ ॥

चिकित्साशास्त्रे तु रसायनप्रयोगतो व्याधिनाशो भवतीत्युक्तम् । परन्त्वाधिभौतिकस्वरूपमिदं रसायनमाध्यात्मिके मानसिके चोपचारे न समर्थमिति स्वयंवेद्यम् । कबीरदाससमकालीनाः कति हठयोगिनो योगेन सहैव रसायनशास्त्रद्वारा साधारणजनाकर्षणं कुर्वन्तो जनप्रियतां च लभमाना योगभ्रष्टा वर्तन्ते स्म । अत एव तद्बाह्याडम्बरसिद्धिनिःसारतां ख्यापयितुं नामादृते परमात्मदर्शनस्य (सिध्देः) न कोऽप्युपायोऽस्तीति च

स्पष्टीकर्तुमिदमाह। अणिमाद्यष्टसिद्धयोऽपीश्वरप्रसादसाध्या इति मल्हणस्तोत्रे यदुक्तं तदपि स्मर्तव्यम्–

दिव्यौषधीरसरसायनधातुवादा
योगा वशीकरणगारुडखन्यवादा।
पातालखड्गघटिकाञ्जनमन्त्रवादा
सिध्द्यन्ति तस्य शिव! यस्य भवान् प्रसन्नः।

स्वपन् स्मरेद्यस्तु नरो रमेश-
मजानता तेन कृतं हि पुण्यम्।
तदीयपादावुत रक्षितुं भो
मदीयचर्मार्पणमेव कुर्याम् ॥ १२ ॥

यदृच्छया (विना भक्तिं) स्वपन्नापि भगवन्नामस्मरणं यःकरोति तस्य महिमातिशयमत्र वर्णितम्। भगवन्नामकीर्तन-पवित्रितात्मा मनुष्यो बहुमन्तव्य इति ध्वन्यते। अनुद्दिष्ट नामकीर्तनमपि यदीदृशं पुण्यकरं, भक्तियुतं तदेव मुक्तिदायकमिति स्वयंवेद्यम्। कल्याणकृत् शुभं फलमश्नुते इत्यत्र गीतोक्तिरेव प्रमाणम्–

न हि कल्याणकृत्कश्चित्
दुर्गतिं तात गच्छति। (vi 40)

एतदेव मल्हणस्तोत्रे निरूपितं यथा-

शाठ्येन येऽपि भगवन्तमनन्तशक्तिं
शम्भो ! भवन्तमभवं भविनो नमन्ति ।
तेऽप्यन्धकारमतिघोरकृतान्तदन्त-
यन्त्रान्तरालगहनं न पुनर्विशन्ति (7) इति

अत्रैव विषये पाशुपतोक्तिरपि प्रमाणम्-

नामानि यो महेशस्य
गृह्णन्त्यज्ञानतोऽपि वा ।
तेषामपि शिवो मुक्तिं
ददाति किमतःपरम् ॥ इति ।

पश्यामि यत्रापि विभोः प्रकाशः
दृग्गोचरं तत्र भवेन्ममाद्य ।
समीक्षितुं तत्र गतः प्रकाशं
जातस्तदा देवसमान एव ॥ १३ ॥

भारतीयभक्तिसंप्रदाये परमात्मा प्रियतमः पतिरिति परिगणितः । प्रत्येकं जीवात्मा भार्यारूपेण कीर्तितः । वैष्णवे वीरशैवे वा मते सतीपतिभावना या परिकल्पिता सूफीमतेऽपि परिकल्पितैव सा । परन्तु भेद इयानेव यत् सूफीमतानुसारेण परमात्मा प्रियतमा प्रत्येकं जीवात्मा तदनुसरणं तत्प्राप्तिकृते कुर्वाणः प्रियतम इति वर्ण्यते । अद्वैतवेदान्ते यदुक्तं तस्याविष्कारमत्र कबीरदासःकरोति । भ्रमरकीटन्यायेन जीवात्मा यदा

परमात्मनामकीर्तने सदा मग्नस्तदा सोऽपि परमात्मस्वरूपमेति। अर्थादन्ततो गत्वा जीवात्मनपरमात्मनोरैक्यमेव भक्तियोगस्य परमोद्देशः।

वसन् सदा शून्यगृहे शृणोमि
अनाहतं नादमहं महान्तम्।
आविर्भवेदीश्वर आत्मसंस्थः
दीपे यथा रोमगणप्रकाशः ॥ १४ ॥

ब्रह्मरन्ध्ररूपिगृहे सुषुम्नानाडीद्वारा (यदा कुण्डलिनी शक्तिःजाग्रता भवति) वासो यदाक्रियते, अनाहतनादश्रवणमानन्दजनकं भवतीति योगविषयोऽत्र सम्यग्वर्णितः। नादानुसन्धानभाजां गतिः कीदृशी भवतीत्यत्र हठयोगप्रदीपिकोक्तः श्लोक एक द्रष्टव्यः—

नादानुसन्धानसमाधिभाजां
योगीश्वराणां हृदि वर्धमानम्।
आनन्दमेकं वचसामगम्यं
जानाति तं श्रीगुरुनाथ एकः॥ iv 81

नष्टं ममत्वं च विमुक्तिलाभा—
दगम्यब्रह्मण्यधिवास एव।

परात्परं त्वां समवीक्ष्य कश्चित्
ममास्ति लोके ममतामयः किम् ॥ १५ ॥

यावदहंकारममकारादिभिर्मानवो बध्नस्तावत् मुक्तिमार्गदर्शनमपि न साध्यं भवति। किमुत तन्मार्गेण यात्रा ! यदा मायाजवनिकापसरणं भवति, तदैवात्मज्ञानबलात् ब्रह्मसाक्षात्कारः सम्भवति। भगवद्दर्शनंविना कापि तस्याशा योगिनो न भवति।

आत्मानुभूतिं प्रति कोऽपि पृच्छेत्
तस्योत्तरं नास्ति ममेह सम्यक्।
मूको गुडं भक्षयितुं प्रवृत्तः
स्वादं कथं वक्तुमिहास्ति शक्तः ॥ १६ ॥

मौनं ब्रह्मेति यदुक्तं तस्यायं भावोऽत्र विशदीकृतो दृश्यते। 'मौनं तस्य व्यख्यानं शिष्याश्छिन्नसंशयाः।' इत्यपि वाक्यमेतदेव समर्थयति। एवंसति यः कोऽपि ब्रह्मज्ञान्यहमिति चोद्घोषयति स दाम्भिक इत्यत्र नास्ति सन्देहलेशः। मूकानुभूतगुडखादननिदर्शनमत्रातीवमनोहरम्। दिव्यानुभवस्य वागगोचरत्वमेव समुचितम्। सर्वज्ञः सर्वशक्तोऽहं इति ब्रुवाणाः पुरुषाः बहवः सन्ति लोकेऽस्मिन्, किन्तु ब्रह्मज्ञानी मौनमाश्रित्य यत्रापि कुत्राप्यगोचरस्तिष्ठति। ईश्वरानुभूतिमतां प्रवचनपटुत्वं केनापि न श्रुतम्। अयमस्य मथितार्थः— स्वानुभववेद्यो ब्रह्मानन्दः। 'यतो

वाचो निवर्तन्ते अप्राप्य मनसा सह' इत्यौपनिषदिकं वक्ष्यमेवात्र प्रमाणम्।

न लेखनेनापि न पत्रतो वा
परात्परब्रह्मफलं कदापि।
वधूवरौ सङ्गममत्र यातौ
विवाहयात्रा भविता विवर्णा ॥ १७ ॥

पूर्ववदत्रापि दिव्यानुभूतेर्वागगोचरत्वममुसन्धेयम्। जीवात्मपरमात्मनोरैक्ये सति पञ्चभौतिकशरीरस्वास्थ्यं न रोचते। यदा वधूवरौ समागतौ तदा विवाहसमारम्भः निरस्यते। तथैव मुक्तिपर्यन्तमेव धर्मसाधनं शरीरं स्वास्थ्यमयं भवतीति विवाहसमारम्भनितदर्शनद्वारा कबीरदासेन वर्णितम्।

दुर्गुणं नैव गृह्णाति
गुणग्राही तु सज्जनः।
सर्वकायस्थितं देव-
मलिः पुष्पासवं यथा ॥ १८ ॥

सर्वेषां हृदि स्थितं परमात्मानं द्रष्टुमिच्छन् साधुः तेषामवगुणानामुपेक्षां करोतीत्यत्र भर्तृहरेः पद्यांशः स्मरणीयः-

परगुणपरमाणून् पर्वतीकृत्य नित्यं
निजहृदि विकसन्तः सन्ति सन्तःकियन्तः ।

किन्तु परदोषवीक्षणे सहस्राक्षायमाणाः असाधवः स्वां हानिमेव लभन्ते इति वक्तव्यम् । 'नीचादपि सुभाषितमि'ति सुभाषितकारवचनमनुसृत्य सर्वज्ञनामा कर्णाटकभाषाकविः स्वीयसर्वज्ञतारहस्यमित्थ प्रकटयति–

सर्वेषां मानवानां हि
सकाशाद् प्राप्य सन्मतिम् ।
सर्वज्ञश्चास्मि संवृत्तः
वीतगर्वःसदाभवम् ॥ इति ।

एवं पुरोमागित्वहानात् गुणग्रहणबुद्ध्यात्यन्तं कल्याणं साध्यमिति पुष्पासवमग्नमधुपोपमया विवृणोति कबीरदासः ।

तदीश्वराख्या भविता हि गव्यं
प्रपञ्चकार्यं सलिल हि तावत् ।
स राजहंसो भविता महात्मा
पयःपयोभेदकरो हि साधुः ॥ १९ ॥

नीरक्षीरविवेके तु हंसो हंसो बको बक इति न्यायेन नीरवन्नीरसं संसारव्यवहारं परित्यज्य दुग्धरूपं भगवन्नामकीर्तनं

हंसरूपी साधुः करोति इत्यत्र रूपकालङ्कारसामंजस्यमवलोकनीयम् ।

शुचि स्मरन्त्येव नराः सुरेशं
सुखे पुनः विस्मरणं नराणाम् ।
सुखेऽपि यो वा स्मरति प्रभुं तं
कथं भवेत्तस्य शुचोऽवतारः ॥ २० ॥

ईश्वरविस्मरणादेव नराणां शोकावतार इति साधु भण्यते ।

पूर्वपुण्यफलान् सर्वान्
भोगान् भुक्त्वा महीतले ।
ईशविस्मरणाद् दुःखं
प्राप्नुवन्ति नराः पुनः ॥

इत्ययमाशयः सर्वज्ञेनापि कथितः-

नेशविस्मरणं वृद्धौ यः करोति स पण्डितः ।
विपत्तौ दुःखितो यस्तु स मूर्ख इति कथ्यते ॥

अत एव ईशविस्मरणात्-

मूढो विवेकविकलः सकृदूर्ध्ववाहुः
किं न श्रुणोषि यदहं हर रारटामि। इति

मल्हणः स्वीयां दुःखावस्थां निवेदयति स्वीये शिवस्तोत्रे। भगवद्भक्तचतुष्टयं प्रथम आर्तोऽत्र लक्ष्यीकृतः। उक्तं यथाः-

चतुर्विधा भजन्तें मां जनाःसुकृतिनोऽर्जुन ।
आर्तो जिज्ञासुरर्थार्थी ज्ञानी च भरतर्षभ ।।

(गीता vii 16)

भगवत आर्तत्राणनिदर्शनं गजेन्द्रमोक्षे द्रष्टव्यम् ।

रम्याक्षमालाभ्रमणं कराग्रे
मुखे च जिह्वाभ्रमणं सशब्दम् ।
दिशासु चित्तभ्रमणं यदि स्यात्
प्रभुस्मृतिर्नैव क्वचित्समग्रा ॥ २१ ॥

चञ्चलस्य मनसो निग्रहं वायोरिव सुदुस्करमिति मन्यमानायार्जुनाय श्रीकृष्ण इत्थमुपदिशतिः–

असंशयं महाबाहो मनो दुर्निग्रहंचलम् । (गीता vi 35)

चाञ्चल्यं मनसो बसवेश्वरोऽपि विवृणोति–

शाखासु संचारपरो यथा कपि–
स्तथैव मे चित्तविकारपूर्णता ॥
न चैकतस्तिष्ठति चञ्चलं मनः
तस्यास्तु ते पादसरोजभृङ्गता ॥ इति ।

एकाग्रतां मनसो विना क्रियमाणभगवत्स्मरणं निष्फलमिति सर्वज्ञोऽपि वदति । यथा–

चित्तशुद्धिं विना तस्य देवमूर्तिप्रदक्षिणा ।
तैलयन्त्रनियुक्तस्य भ्रमणं वृषभस्य तत् ॥

एवं कर्मेन्द्रियसंयमः केवलं मिथ्याचारलक्षणमिति गीतायां विशदीकृतम् । यथा–

कर्मेन्द्रियाणि संयम्य य आस्ते मनसा स्मरन् ।
इन्द्रियार्थान् विमूढात्मा मिथ्याचारःस उच्यते ॥
(iii 6)

धनार्जनं नैव मुनिःकरोति
कदाप्ययं स्वोदरपूरणार्थम् ।
पुरश्च पश्चादपि तस्य साधोः
हरिः सदौदार्यमयः स्थितोऽस्ति ॥ २२ ॥

साधोरत्रापरिग्रहबुद्धिः सूच्यते । वराकोदरपूरणं यद्यावश्यकं यद्यदुपलब्धं च तेनैव तुष्टःसन् भविष्यदर्थे धनादिसंग्रहं कदापि न करोति । संग्रहबुद्ध्या परमात्मविस्मृतिर्जायते यतो मानवोऽसौ धनपिशाचग्रस्तः सदैव तदर्जन एव परिश्रान्तःसन् भगवत्स्मृतिकरणार्थं समयं न लभते । अत्र श्रीवसवेश्वरस्य 'वस्त्रैकसूत्रं अशनैकतण्डुलं न संग्रहिष्ये' इति वदन्नपरिग्रहबुद्धेः पराकाष्टां प्रकटयति । यदृच्छालाभसंतुष्टः साधुःसदैव परमात्मस्मरणं तन्नामकीर्तनं च कुर्वन्नास्ते । तस्य नित्ययुक्तस्य योगक्षेमं वोढुं सदेश्वरः सन्नद्धोऽस्ति । आङ्ग्लभाषासुभाषितमेकं

स्मर्तव्यमत्र। We must eat to live but not live to eat. (जीवनधारणार्थं भक्षयेदन्नं, न पुनः भक्षितुमेव जीवतु मानवः) इति।

स्वामिन् प्रयच्छ मम धान्यचयादि तावत्
यावत् कुटुम्बभरणं भविता सुखेन।
नाहं क्षुधाकुलतया व्यथितो भवामि
साधुर्ग्रहान्मम च यातु क्षुधातृषार्तः ॥ २३ ॥

सर्वोपकारक्षम आश्रमे ग्रहस्थाश्रमे वर्तमानः कबीरदासः स्वीयकुटुम्बभरणार्थं साधूनामपि सत्काराय च यद्धनादिकमावश्यक तदेवेश्वरो मे प्रयच्छतु न ततोऽधिकमिति पूर्ववदत्रापि स्वीयापरिग्रहबुद्धिं प्रकटयति।

शास्त्राणां पठनं भूयः
केवलं न कृतं मया।
मननं चापि तत्तेषां
तथापि मनसो भ्रमः ॥ २४ ॥

शास्त्राध्ययनमात्रेण मननमात्रेण वा मनसि वर्तमानसंशयच्छेदो न शक्यते। एतद्दुःखं कस्य वा पुरतः ब्रवीमीति कबीरदासस्य मनोव्यथात्र दरीदृश्यते। मनसः भ्रमनिरसनार्थं नैकेऽप्यु-

पायाः कीर्तिताः। तथा तेषु सर्वेषूपायेष्वनुष्ठीयमानेष्वपि भ्रमस्तथैव मनसि वर्तत इति भावः।

दुःखमूलं ममत्वमितिविषये अधोलिखितःश्लोक एव प्रमाणम्–

ममेति परमं दुःखम्
न ममेति परं सुखम्।
देहिबन्धस्य मोक्षस्य
ममेति न ममेति च॥

ईशस्तुतिः कटुतया न मनःप्रियास्ति
संपत्स्तुतिर्मधुमयी मनसःप्रिया सा।
द्वैधीभवत्यनुदिनं मनुजस्वभावः
माया न तस्य मिलिता भगवंस्तथैव ॥ २५ ॥

'इतो भ्रष्टस्ततो भ्रष्ट' इति न्यायेनेश्वरनामस्मरणससारविषयभोगयोः दोलायमानःमनुष्यो नैहिकसुखं पूर्णतया भुङ्क्ते नापि भगवदनुग्रहं सम्पादयति। त्रिशंकुवदन्तराले तिष्ठतस्तस्य स्थितिरतीवशोचनीया च भवति। भगवन्नामस्मरणरूपस्यानन्दस्य स्थितिःसात्विकेति गीतायां स्पष्टीकृतम्–

यत्तदग्रे विषमिव परिणामेऽमृतोपमम्।
तत्सुखं सात्त्विकं प्रोक्तमात्मशुद्धिप्रसादजम्॥

(गीता xviii 37)

जगता यदि सम्बन्धः
सुभक्तिर्नैव जायते ।
तत्त्यक्त्वा हरौ सङ्गं
यःकरोति स भक्तिमान् ॥ २६ ॥

यावत्पर्यन्तं जगत्यस्मिन् मानवस्य सङ्गः भौतिकेषु वस्तुष्वेव संजायते, तस्य विनाश एव संभवतीति गीतायां सुष्टूक्तं श्लोकद्वयेन–

ध्यायतो विषयान् पुंसः सङ्गस्तेषूपयाजते ।
सङ्गात्संजायते कामः कामात्क्रोधोऽभिजायते ॥
क्रोधाद्भवति संमोहः संमोहात्स्मृतिविभ्रमः ।
स्मृतिनाशाद् बुद्धिनाशो बुद्धिनाशात्प्रणस्यति ॥

(ii 62, 63)

अतस्तत्रैव सङ्गं त्यक्त्वा कुर्वाणस्य कर्मात्मशुद्धिर्भवतीति सम्यक् प्रतिपादितम्–

कायेन मनसा बुद्ध्या केवलैरिन्द्रियैरपि ।
योगिनःकर्मकुर्वन्ति सङ्गं त्यक्त्वात्मशुद्धये ॥

(v 11)

पद्मपत्रमिवाम्भसि संसारे वर्तमाना अपि तेन न ते बद्धाः ।

यस्यास्ति कामो भविता न भक्तः
क्रोधी न लोभी न भवेत्सुभक्तः।
जातौ न यस्यास्ति रुचिर्न वर्णे
शूरस्स एवास्ति नरःसुभक्तः ॥ २७ ॥

कामाद्यरिषड्वर्गवशवर्तिनो नरस्येश्वरे दृढा भक्तिर्न जायते। ये कामादिभिरभिभूयमानास्ते दुष्कृतिनःपरमात्मानं न विन्दन्तीतिविषये गीतोक्तिरेव प्रमाणम्-

न मां दुष्कृतिनो मूढा प्रपद्यन्ते नराधमाः।
माययापहृतज्ञाना आसुरं भावमाश्रिताः॥ (vii 15)

यतः त्रिविधं नरकस्य द्वारं तत्रैव वर्णित यथा-

त्रिविध नरकस्येदं द्वारं नाशनमात्मनः।
कामः क्रोधस्तथा लोभस्तस्मादेतत्त्रयं त्यजेत् ॥
(xvi 21)

किन्त्यरिषड्वर्गमेनं विजित्य ये भगवन्तं पर्युपासते, तेषां कीदृशी गतिरित्यत्रापि गीतोक्तःस्मर्तव्या-

अनन्याश्चिन्तयन्तो मां ये जनाःपर्युपासते।
तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यहम् ॥

यथा जलं मत्स्यहितं जगत्यां
यथा धनं लुब्धजनाभिलाषः।

यथा सुते मातृमनःप्रसाद-
स्तथाभिधानाभिरतिः सुभक्तः ॥ २८ ॥

'भक्त्या मुक्तिःकलौ युगे' इति नीत्येश्वरस्मरणादृते मोक्षोपायो न कोऽपि संभवतीति साधु भणितम्। ईश्वरानुरागः कीदृशो भवत्विति कबीरदास उपमात्रयेण विवृणोति। जलाभिनीलाषी मीनः धनाभिलाषी लुब्धमानवः सुताभिलाषिणी मातेति प्रसिद्धोपमात्रयमिदं भक्तस्येश्वरानुरागसमर्थकं भवति।

फलाभिलाषी यदि वास्ति भक्तः
तदाऽफला तस्य भवेत्तु निष्ठा।
स देवदेवो यदि कामशून्यः
कथं सकामो लभते महेशम् ॥ २९ ॥

अर्थार्थी (सकामो) यदि परमात्मानं भजति अर्थप्राप्तिरस्यावश्यं संभवति, किन्तु भगवान् दूरतो वर्तते। यतः ईश्वरो निष्काम इति गीतायामुक्तं यथा—

न मे पार्थास्ति कर्तव्यं त्रिषु लोकेषु किञ्चन।
नानवाप्तमवाप्तं वा वर्त एव च कर्मणि॥ (iii 22)

स्वर्गकामाःयजेतेत्यादि श्रुतिवाक्यं सकामकर्मबोधकम्, किन्तु भगवदनुग्रहदायिका निष्कामभक्तिरेवेत्यत्र न संशयः।

भवेदसौ कर्मगणो विनिन्द्यः
परात्परब्रह्मरतिस्त्वकामः ।
कबीरदासोक्तिमिमां शृणुध्वं
"त्यजन् हि धर्मं भव भक्तिमांस्त्वम्" ॥ ३० ॥

धर्मशब्देनात्र वैदिकक्रियाकाण्डः ससूच्यते। गीतायामपि क्रियाकाण्डनिन्दा वर्तते एव। यथा–

त्रैगुण्यविषया वेदाःनिस्त्रैगुण्यो भवार्जुन ।
निर्द्वन्द्वो नित्यसत्त्वस्थो निर्योगक्षेम आत्मवान् ॥
(ii 45)

यावनर्थ उदपाने सर्वतःसंप्लुतोदके ।
तावान् सर्वेषु वेदेषु ब्राह्मणस्य विजानतः। (ix 46)
'सर्वधर्मान् परित्यज्य मामेव शरणं व्रज' (xviii 60)

इति भगवदुक्तिरेदेव दृढयति ।

न जायते देवरतिर्हि वाटे
न वा विपण्यां लभते नरस्ताम् ।
यदि प्रजायाः रुचिरा नृपस्य
शिरप्रदानाल्लभते नरस्ताम् ॥ ३१ ॥

देवरतिः यत्रकुत्रापि न संभवति । न वा विपण्यां सा विक्रीयते । लोकेऽस्मिन् कतिपयविषया विक्रेयवस्तूनि भवितुं नार्हन्ति । तेषु वस्तुष्वेका देवानुरक्तिः । लौकिकप्रीतेरपि विपण्यां प्राप्तिरसभवा यदि, तर्हि देवप्रीतेःभक्तेर्वा लाभः कुत्रापि कथं संभवति । तदर्थं शिरोदानमावश्यकम् । अर्थात् सर्वार्पणभावेनैव (अहंकारादित्यागेनैव) भगवद्भक्तिः साध्या भवतीति कबीरदासस्याशयः ।

यस्मिन् घटे प्रेम भवेन्न पूर्णं
श्मशानतुल्यो भविता सदैव ।
भस्त्रा यथा लोहकरस्य भूयात्
श्वसन् पुनः प्राणगणेन हीनः ॥ ३२ ॥

भगवद्भक्तिरहितो मनुजः श्वसन्नपि शवतुल्य एव भवति । लोहकारस्य भस्त्रा यथा श्वसति तथैव सोऽपीति भगवदनुरागहीनजीवितनिरर्थकतां द्योतयति कविः । यथा ममैव सूक्तिः—

मानुषीं तनुमाश्रित्य यो न भक्तियुतो भवेत् ।
जीवन्नपि मृतो मर्त्यस्तेन जातेन किं फलम् ॥ इति

तत्त्वद्वयं जगति जीवमहेशयोस्तद्
भिन्नं कदापि भविता न तु योगबुद्धेः ।
कायद्वये श्वसितमेकमिहास्ति यद्वत्
जानीहि मे तव हृदा हृदयं त्वभिन्नम् ॥ ३३ ॥

'यादृशी भावना यस्य सिद्धिर्भवति तादृशी' इत्युक्तिमनुसृत्य विचारिते सति सर्वमेतत् सिध्द्यति यद् यदा कश्चित् मानवोऽन्यं प्रति स्नेहपूर्वकं व्यवहरति तमन्यं सस्नेहं वा स्मरति सोऽपि तथैवैनं स्मरति।

अन्योन्यं भावयन्तौ तौ
शान्तचित्तौ परस्परम्।

अनयैव सरण्या जीवात्मा यदि परमात्मानमुद्दिश्य सदैव सस्नेहं स्मरणं करोति, दृढया निष्ठया तत्परो भवति, परमात्मापि तथैव सप्रेम तस्योपरि दयालुर्भवति। तन्मयतया तया द्वयोरेकताप्राप्तिरपि सिध्दयतीति वेदान्तप्रमाणं द्रष्टव्यम्। गीतायामपि भगवान् भणति यथा–

ये यथा मां प्रपद्यन्ते
तांस्तथैव भजाम्यहम्। (iv 11)

परेङ्गितज्ञानमपि लौकिकेऽपि प्रपञ्चे सानुभूत्या परस्परानुरागेण सम्भवति।

पेयस्त्वया प्रेमरसो विशिष्टः
मानेऽपि ते रक्षणबुध्दिरेषा।
खड्गद्वयं कोशगतं कथं स्यात्
नैतच्छ्रुतं दृष्टमिदं कदापि ॥ ३४ ॥

एकस्मिन् कोशे खड्गद्वयस्थितेरसंभावनादृष्टान्तेन लौकिक-स्वाभिमानरक्षा परमात्मप्रीतिस्तदनुभूतिश्चेति द्वयस्यास्य युगपत्-संभावनां निराकरोति कबीरदासः। द्वयोरेकग्रहणे भक्ताः भगवत्प्रेम-रसपानमेवाङ्गीकुर्वन्तीत्यत्र कति सन्ति निदर्शनानि। मीराबाई-नाम्नी भक्ताग्रणीः कवियित्री, अक्कामहादेवीनाम्नी वैराग्यमूर्तिः शिवप्रीतिमुग्धा च कर्णाटकभाषाकवियित्री तेषु विशिष्येते।

प्रीत्या यदा मिलति तन्मिलनं पवित्रं
व्यर्थं भवेद्यदि मिलत्यनुरागशून्यम्।
चित्तेन चित्तमिलनं भविता न यावत्
तावत् शरीरमिलनं सफलं कथं स्यात् ॥ ३५ ॥

उक्तिरेषा स्त्रीपुरुषयोर्मिलतविषये साभिप्राया वर्तते। यथा ममैव सूक्तिरत्र स्मर्तव्या–

विफलं भवति दाम्पत्यं
मिलनं यदि दैहिकम्।
आत्मिकं मानसं चैव
सार्थकं मिलनं भवेत्॥

कविकुलतिलकेन कालिदासेनाप्येतदेव पर्यायेणोक्तं यथा–तप्तेन तप्तमयसा घटनाय योग्यम् (विक्रमोर्वशीयं (iii 18)) तेनैव पुनरप्यन्यत्र सुष्टूक्तं यथा–

अनातुरोत्कण्ठितयोः प्रसिध्द्यता
समागमेनापि रतिर्न मां प्रति ।
परस्परप्राप्तिनिराशयोर्वरं
शरीरनाशोऽपि समानरागयोः ॥ विक्र (iii 15)

सत्येवं जीवात्मपरमात्मनोरैक्यं कथं स्यादिति स्वयमेवो ह्यताम् ।

न त्वं हरिं भज पुनर्भज तत्सुभक्तान्
श्रेयोऽभिलाष इह चेत्तव मानसेऽस्ति ।
धान्यं धनं बहुविधं हरिणा प्रदेयं
भक्तैःप्रसन्नमनसा हरिरेव देयः ॥ ३६ ॥

'भक्ताः हरिं दर्शयन्ति, अतो भक्तानेव भजतु' इति कबीरदासः सयुक्तिमाह । यतः

'हरिःप्रीतो भवेल्लोके यच्छत्यनुपमं धनम् ।'

किन्तु परमात्मप्राप्तिर्भगवदनुभूतिर्वा भक्तानुग्रहेणैवेति कबीरदासाभिप्रायः । एतदेव प्रकारान्तरेण सर्वज्ञः विशदयति–

"गुरोः शिवस्य यो भेदः
सुमहानिति मे मतिः ।
गुरुर्दर्शयते देवं
न देवो गुरुदर्शकः ॥" इति ।

चन्द्रस्य तारापथवास एव
कुमुद्वतीवारिचयाधिवासः ।
किन्त्वेतयोः प्रेम विकासमेति
यं कांक्षते सोऽस्ति मनःसमीपे ॥ ३७ ॥

कुमुद्वती जले वसन्त्यपि चन्द्रमसाकाश उदयमानेनानुरागवती, तस्मात् स तां विकाययतीति निसर्गनियमः । अनेनेदं सिध्द्यति यद् यो यं मनसा कांक्षते, स दूरे वसन्नपि मनसा तस्य निकटस्थ एव भवति । एवं सति हृद्देशे वर्तमानमीश्वरं यद्यनुदिनं प्रतिक्षणं जीवात्मा स्मरति रारटति तदर्थं, तयोः समागमः सुलभतया साध्य इति वक्तुं शक्यते। किन्त्वीश्वरं प्रति तादृशानुरागोत्कटसंभावना कदाचिदेव भवतीति स्वयंवेद्यम् ।

पत्रं लिखामि भगवाननुरागपात्रं
दूरे वसत्यनुदिनं यदि मद्वियुक्तः ।
चित्ते तनौ नयनयोर्यदि तस्य वासः
आवश्यकं भवति किं खलु दूतकर्म ॥ ३८ ॥

जीवो ब्रह्मैव नापरः इति शाङ्करादैतमतेन जीवात्मपरमात्मनोरैक्यं नैसर्गिकम् । तथापि मायापहृतचेहसो मानवस्येश्वरान्वेषणं संपद्यते । यदुक्तं मयैव–

सर्वज्ञः सर्वव्यापी च सर्वशक्तः सदाशिवः ।
प्रत्येकजीविहृद्देशे वर्त्तमानो यदा स्थितः ॥
अन्यत्रान्वेषणं तस्य निष्फलं पत्रलेखनम् ।
संदेशाहरणं तस्य युक्तियुक्तं न वा क्वचित् ॥

वियुक्ता जीवितेशेन
संदेशं प्रेषयत्यतः ।
विना जलेन जीवेश ।
मीनो जीवति किं क्षितौ ॥ ३९ ॥

मीनो जलं विना न जीवतीत्यत्र बसवेश्वरवचनमपि प्रमाणं-

मत्स्यःकिं जीवितुं शक्तः आगतो वारिणो वहिः ।
सङ्गमेश्वर । सद्भक्तवृन्दे स्थापय मामिह ॥

अनेन निसर्गसुन्दरेण निदर्शनेन मायया वियुक्तो जीवात्मा परमात्मप्राप्तिमन्तरेण कथंविश्राम्यति ? अत एवोक्तम्-

विरहविधुरो जीवात्मायं जलाद्बहिरागतः
मीनो यद्वत् भवति विकलो मानसे दह्यमानः ।

किन्तु-

मायाजालविनिर्यातो वर्तमानो नरःपुनः ।
परमात्मानं विहायान्यत् प्राप्तुं नेच्छति लौकिकम् ॥

स्वामिन् वियोगविधुरा विकला मदीया
प्राणाः भवन्ति विवशाः विरहाग्नितप्ताः ।।
शान्तिं पुनर्मरणजां कृपया प्रयच्छ
संदर्शनेन सुखदो भव वा महेश ॥ ४० ॥

विरहे पीडां यानुभवति तस्याः वर्णनमशक्यमेव । अवर्णनीयपीडानुभवं कुर्वंतो जीवात्मनो मृत्युरेव वरमिति यद्भण्यते, तद्विरहतीव्रावस्थाद्योतकम् । दशविरहावस्थासु नवमा स्थितिरत्र वर्णितेति शक्यं वक्तुम् । यतः क्षणविलम्बेन (भगवद्दर्शनेन विना) तस्य मरणं संभवतीत्यत्र न कोऽपि सन्देहलेशः ।

कबीरदासो भिषजं ब्रवीति
"पीडा मदीया भवता परीक्ष्या ।"
जानाति नो नैव करं गृहीत्वा
यतो हृदिस्था भविता सुपीडा ॥ ४१ ॥

दैहिकं रोगवर्गं यो परीक्षति भिषग्वरः ।
हृत्पीडां तु कथं गुर्वीं दूरीकर्तुमलं भुवि ।।

वैद्यः विरहाग्नितापतप्तानां वेदनां दूरीकर्तुमसमर्थ इति कबीरदासेन यदुक्तं तदतीवयुक्तिसंगतम् ।

मलिना रूपहीना वा
मतिहीना भवेदपि।
यदि पतिव्रता नारी
कोटिरामासमा भवेत् ॥ ४२ ॥

अनुरागवती पतिव्रता यद्यपि कुरूपा, तथापि पुरतस्तस्याः कोटिशोऽपि सुन्दर्यः कान्तिहीना भवन्तीति कबीरदासाभिप्रायः। श्लोकेऽस्मिन् पतिव्रता भगवद्भक्तियुतो जीवात्मा तथा पतिः परमात्मा इति स्वयंवेद्यते। भक्तिमतो मानवस्य भौतिकं रूपादिक न महत्त्वपूर्णमिति तात्पर्यम्।

साधुः परोपकरणे कटिबद्ध एव
मेघो धरामिह जलैरभिवर्षतीव।
स्पर्शेण शीतलतया निजहस्तयोर्यः
ह्यन्यस्य लोकनिवहस्य हिनस्ति तापम् ॥ ४३ ॥

सज्जनः सदैव वृक्षेण मेघनिचयेन चोपमीयते। उक्तं यथा-
पिबन्ति नद्यः स्वयमेव नाम्भः
फलानि खादन्ति स्वयं न वृक्षाः। इति।
अस्मिन्नेव सन्दर्भे भर्तृहरेरेकश्लोकस्य प्रथमश्चरणः द्रष्टव्यः।-
एते सत्पुरुषाः परार्थघटका स्वार्थान् निघ्नन्ति ये। इति।

अत एव एतादृशानां परोपकारिणामुद्भवः भुवः भूतये कदाचिदेव भवतीति नागानन्दे शङ्खचूडेन यदुक्तं तदतीव-सुसङ्गतम्–

जायन्ते च म्रियन्ते च मादृशाः क्षुद्रजन्तवः।
परार्थे त्यक्तदेहानां त्वादृशामुद्भवः कुतः॥

पञ्चानना न निवहे निवसन्ति यद्वत्
हंसा न पङ्किषु वसन्ति सरोजलाभाः।
रत्नानि तानि निचये न लभेत कश्चित्,
सन्तो न यान्त्यपि गणे विरला हि तद्वत् ॥ ४४ ॥

साधूनां विरलताऽत्र युक्तिगर्भया गिरा वर्णिता। पूर्वमेव सुभाषितकारेणोक्तं यथा–

. . . . . चन्दनं न वने वने।

साधवो नहि सर्वत्र मौक्तिकं न गजे गजे॥ इति। अनयैव सरण्या हंसानां विरलता तद्विरहेण सरोवराणां हानिश्चाधो लिखितपद्ये वर्णिते यथा–

यत्रापि कुत्रापि भवन्ति हंसा
हंसा महीमण्डलमण्डनानि।
हानिस्तु तेषां हि सरोवराणां
येषां मरालैः सह विप्रयोगः॥ इति।

'सन्ति सन्तः कियन्तः।' इत्यपि भर्तृहरेः प्रश्नमेतदेव दृढयति।

धनार्जनं नैव करोति लोके
न वा स्त्रियं योऽनुभवेत् कदाचित्।
असौ भवेत्सज्जनमौलिभूत-
स्तदङ्घ्रिधूलिर्भवितुं ममेच्छा ॥ ४५ ॥

एतदेव प्रकारान्तरेण बसवेश्वरोऽपि तत्पूर्वमेव वर्णितवान् यथा-

ब्रह्मणो पदवीं नाहं कांक्षये नापि विष्णुताम्।
सङ्गमेश्वरभक्तानां पादधूलिपदं भवेत्। इति।

एवं सतां पादधूलिताप्राप्तौ सद्गतिप्राप्तिर्भवतीत्यत्र कश्चन श्लोकः प्रमाणम्-

कीटः सुमनसः सङ्गादारोहति सतां शिरः। इति।

निरञ्जनब्रह्मविलोकनाय
सतःशरीरं मुकुरो भवेत्तत्।
निरञ्जनं दृष्टुमतिर्मनुष्यः
सतां शरीरेषु लभेत कश्चित् ॥ ४६ ॥

ईश्वरसाक्षात्कारे साधुशरीरमेव मुकुरायत इति रूपक-द्वारा कबीरदासेन यदुक्तं, तदतीवमनोज्ञम्। अव्यक्तस्य परमात्मनो व्यक्तरूपोऽयं सत्पुरुष इति वक्तुं शक्यते। 'शरीर-बद्धः प्रथमाश्रमो यथा' इति वटुवर्णने कालिदासेन यथा मूर्तीकरणं स्पष्टीकृतं, तथैव कबीरदासेनात्र कृतम्। Personification नामालङ्कारोऽत्रोदाह्रियते। मज्जनो देहवान् देवः इति सुष्टु भणितम्।

चन्द्रो न शीतकिरणो भविता कदापि
प्रालेयरश्मिरपि नो जनतापहारी।
साधुर्भवेत्सुखकरो निजशीतलत्वात्
देवानुरागपदवीं लभते स एव ॥ ४७ ॥

गङ्गा पापं शशी तापं दैन्यं कल्पतरुस्तथा।
पापं तापं च दैन्यं च घ्नन्ति सन्तो महाशयाः॥

इति सज्जनस्वभावो वर्ण्यते। नवनीतादपि मृदुस्साधुरित्यत्र कारणं सुभाषितकारेण दीयते यथा–

'परतापेन सज्जनो द्रवति नो नवनीतम्।' दैवींसंपदमभिजातस्य पुरुषस्य ये गुणा वर्णितास्तेषु परोपकारः भूतदया वा विशिष्यते– 'दया भूतेषु' इत्यादि (गीता xvi–2)।

प्रष्टव्या साधुजातिर्न
पृच्छेज्ज्ञानं महात्मनः ।
खड्गस्य क्रयणं कार्यं
कोशोपेक्षां हि कुर्वता ॥ ४८ ॥

यथा कोशस्योपेक्षां कृत्वा खड्गस्यैव क्रयणं कुर्यात् तथैव साधुजनस्य जातिर्न प्रष्टव्या, किन्तु तज्ज्ञानमवगन्तव्यमिति यत् कबीरदासः ब्रवीति तदतीवसमीचीनम् । उच्यते सर्वज्ञेन–

योगिनश्च कुलं नास्ति ज्ञानिनो छलमेव च ।
वियायसो वास्ति नाधारः कुलभेदो न धूर्जटेः ॥

शिवभक्तानां कुलादिविषये यद्यहं पृच्छामि, तर्हि दण्डनीयोऽहमिति बसवेश्वरो ब्रवीति–

शिवाङ्गभूतस्य च वृत्तिभेदं
भक्तस्य पूर्वाश्रमजातिभेदम् ।
श्रीसंगमेशाकलयामि यावद्
दण्ड्योऽस्मि तावच्छिरसाऽपराधात् ॥

ऋषिमूलं न परीक्षितव्यमिति सुभाषितकारेणापि दृढीकृतमेतदेव ।

साधुःसमुद्रसदृशः स भवेदगाधः
रात्नानि सन्ति विविधान्यपि यस्य गर्भे ।

निर्भाग्यवांश्च लभतेऽश्मचयं करेण
श्रद्दामयो हि लभते बहुशो मणींस्तान् ॥ ४९ ॥

'यादृशी भावना यस्य सिद्धिर्भवति तादृशी'ति नीतिमनुसृत्य सज्जननामापरं समुद्रं सेवमानो मन्दभाग्यः अश्मान्येव लभते न मणिगणम्। किन्तु श्राद्धामयः पुरुषः रत्नचयं यथेच्छं लभते। श्रद्धावान् लभते विद्यामिति सूक्तिरिदमेव स्पष्टीकरोति।

हरिर्हरिजनान्नयूनो
हृदीदमवधार्यताम्।
हरावस्ति जगत्सर्वं
हरिर्हरिजने वसेत् ॥ ५० ॥

अत्र हरिजनपदेन महात्मगान्धीमहोदयेन प्रयुक्तः अस्पृश्यजातिविशेषो न मन्तव्यः। हरिजनो हरिभक्तः इति ज्ञेयम्। स हरिजनो हरिणोऽपि महत्तरः इति सयुक्तिमाह कबीरदासः। यतः जगत्सर्वं हृदि धारयन् हरिरेव हरिजनहृदये तिष्ठति। तदिदं तात्पर्यं यत् ईश्वरः भक्तपराधीनः इति।

"मद्भक्ताः यत्र तिष्ठन्ति तत्र तिष्ठामि पार्वति।"
इति शिवोक्तवचनमेतदेव संकेतयति।

'सः स्थाणुःस्थिरभक्तियोगसुलभः' इति कविगुरोः कालिदासस्य वचनमपि अवलोकयितव्यम्।

साधुः सुवर्णसदृशो भवतीति चित्रं
भिन्नःशतं पुनरयं घटनाय योग्यः।
दुष्टस्तु मृण्मयघटप्रतिमो जगत्या-
मेकप्रहारजनितो भवितास्य भङ्गः ॥ ५१ ॥

सज्जनस्य सुवर्णेन दुष्टस्य च मृण्मयघटेनोपमां दत्वा तयोर्भूयान्भेदः प्रकटीकृतोऽत्र। शतवारं भिद्यमानोऽपि सुवर्णः पुनर्घटनाय भवति। किन्तु मृण्मयो घट एकवारं भिद्यते चेत् पुनर्घटनाय न प्रभवति।

सङ्गः सतां भवति गन्धवतां समीपे
वासो यथा सुरभिचित्तहरः पृथिव्याम्।
गन्धं न यच्छति जनाय यदप्ययं स्वं
सामीप्यतः सुरभियुक्त इति प्रसिद्धम् ॥ ५२ ॥

सुगन्धद्रव्यविक्रेता यद्यपि समीपस्थाय जनाय गन्धदानं न करोति तथापि तस्य सन्निधौ सर्वोऽपि जनः सुगन्धितो भवतीति सर्ववेद्यमेव। तद्वदेव साधुसमीपे वर्तमानानामितरेषां जनानामस्त्येव लाभः। 'सङ्गः सतां कथय किं न करोति पुंसाम्' इति सुभाषितं सज्जनसङ्गसौभाग्यलाभमेव विवृणोति। यदि भारविवचनानुसारेण 'वरं विरोधोऽपि समं महात्मभिः' तर्हि तैः सह मैत्री कियदुपकारक्षमा भवेदिति स्वयंवेद्यम्।

इयं कबीरोक्तिरिदं मनस्तु
विहङ्गमो व्योमचरस्त्वविघ्नः ।
समागमो यैःसह जायतेऽस्य
फलं तथा तस्य भवेद्धि लोके ॥ ५३ ॥

गीतायामुक्तं यत् मनश्चञ्चलं वायोरिव सुनिग्रहं तस्य बन्धनमस्ति । मनश्चाञ्चल्यमन्यथा वा सङ्गतिमपेक्षते इति व्यावहारिकं सत्यम् । सङ्गतिःफलदायितीति सुप्रसिद्धमेव । वियच्चरो यत्रकुत्रापि स्वेच्छयोड्यते, तथैव मनसो विहरणमयश्यं भवति । अतस्तस्य बन्धनाय सत्सङ्गतिः सततं करणीयेति सुष्टु भणितम् ।

गोविन्दश्च गुरुश्चैव
पुरो यदि समागतौ ।
प्रथमं सद्गुरुं वन्दे
दर्शितो येन माधवः ॥ ५४ ॥

गुरुगोविन्दयोर्मध्ये प्रथमं गुरुदेवः वन्द्यः इति यदुक्तं तस्यकारणं निर्दिशति यथा– गुरुणैव दर्शितः गोविन्द इति । गुरुमहिमातिशयोऽत्र कविना वर्णितः ।

पत्रं तु भूमि कलमं वनाख्यं
सप्तैव सिन्धून् मसिभाजनं च ।
कृत्वापि भूयो लिखितुं प्रवृत्तो
नाहं समर्थो गुरुवर्णनेऽस्मि ॥ ५५ ॥

अनेनैव क्रमेण प्रथमं शिवमहिम्नोऽतिशयो वर्ण्यते पुष्पदन्तेन यथा-

असितगिरिसमं स्यात्कज्जलं सिन्धुपात्रं
सुरतरुवरशाखा लेखनी पत्रमुर्वी ।
लिखति यदि गृहीत्वा शारदा सर्वकालं
तदपि तव गुणानामीश ! पारं न याति ॥
(शि. म. स्तो ३२)

मल्हणोऽपि शिवस्तोत्र आत्मनोऽशक्तिमित्थं वर्णयति-

न ब्रह्मविष्णुवचसामपि गोचरस्त्व-
मस्मद्विधस्य किमहो तदवैमि सर्वम् ।
भक्तिस्तथापि शिव मां मुखरीकरोति
युस्मत्स्तुतौ कथय किं करवाणि देव॥ (म. स्तो २)

गुरुःस्पर्शमणिश्चारु-
श्चन्दनस्पर्शशीतलः ।
सद्गुरुस्तूपमातीतो
जीविनां मुक्तिदायकः ॥ ५६ ॥

अत्रापि सद्गुरोः कारुण्यादिसम्बद्धो महिमातिशयः कबीरेण वर्ण्यते। अनेन ज्ञायते यत् कबीरदासो गुरुवर्णने कदापि न श्राम्यति। अतएव दासवरेण्यैः कर्णाटकभाषायामुक्तम्–

गुरोर्दासता यावत् स्वीकृता नैव मानवैः।
तावज्ज्ञानविनाशेन मुक्तिस्तेषां कथं भवेत् ॥ इति।

अस्मच्छरीराणि विषव्रतत्यः
सुधाखनिः सद्गुरुसार्वभौमः।
शीर्षार्पणाद् यद्यपि तस्य लाभ–
स्ततोऽल्पमून्यं भवतीति मन्ये ॥ ५७ ॥

अस्मद्विधविषवल्लीभ्यो विषोन्मूलने सुधाखनिर्गुरुरेव समर्थ इति प्राकारान्तरेण गुरोरेव महिमा स्तूयते। कियतापि मूल्येन गुरुप्राप्तिः कर्तव्येति सुष्टूक्तमत्र। सद्गुरुप्राप्तिः पुण्यविशेषेण भवति।

न वा गुरुर्लभ्यत एव लोके
न वा सुशिष्योऽपि भवेद्धि लभ्यः।
न तत्त्वसिद्धिर्भविता तयोर्यत्
नावा शिलानिर्मितया तितीर्षा ॥ ५८ ॥

सद्गुरोरभावे सुशिष्यालाभे वा परमात्मान्वेषणं शिलानैकया सागरतरणमिवासंभवं भवतीति यदुक्तं तदेवोपनिषदि वर्णितम्–

अविद्यायामन्तरे वर्तमानाः
स्वयं धीराः पण्डितमन्यमानाः ।
दन्द्रम्यमाणा परियन्ति मूढा
अन्धेनेव नीयमाना यथान्धाः ॥ (कठोपनिषत् ii 5)

यः स्वयमेव संसारजालबद्धः सोऽन्यं बद्धं (किन्तु) मुमुक्षुं शिष्यं कथं संसारसागरात्तारयति । अन्धद्वये मिलिते कथं मार्गदर्शनं शक्यमिति द्रष्टव्यमेव ।

बद्धःस्वयं यस्तु लभेत बद्धं
मुक्तेरुपायो न भवेत्कथंचित् ।
सेव्यःस ईशोऽस्ति विमुक्तिहेतु–
रेकक्षणे बन्धनमुक्तिरस्मात् ॥ ५९ ॥

पूर्ववदत्रापि स्वयं पण्डितमन्यमानगुरोः सङ्गे मुक्तिः कथमपि न भवतीति अनुसन्धेयम् । स्थिते एवं विरक्तिपूर्विकया भक्त्येश्वरस्मरणेन परिचर्यया वा मुक्तिःक्वचिदपि संभवतीति सूचितम् ।

गतिर्बकस्येव भवेत्तु यस्य
मरालबुद्धिर्हि भवत्यसाधोः ।

यथा मरालोऽत्ति हि मौक्तिकानि
तथा बको भक्षयितुं न शक्तः ॥ ६० ॥

बकहंसयोः बाह्यसाम्ये तयोर्भेदपरीक्षा कथं स्यादिति पृष्टे कबीरदासःप्रतिवदति मौक्तिकभक्षणमिति। अनेनैव क्रमेण केनचित्सुभाषितकारेण तयोर्भेददर्शनं कृतम्–

हंसो श्वेतो बकः श्वेतः को भेद एतयोर्पुनः।
नीरक्षीरविवेके तु हंसो हंसः बको बकः॥

अर्थात् नीरक्षीरविवेको यथा तयोर्भेदपरीक्षोपायस्तथा मौक्तिकभक्षणमपि भेदोपाय इति सुष्टूक्तम्।

सज्जनस्तु विरक्तिभक्त्यादिगुणोपेतःसन् मुक्तिमार्गेऽग्रेसरो भवति। परन्तु असाधुः सांसारिकबन्धनमुपेतो दम्भादिभिः परिभूयमानो मुक्तिमार्गविमुख एव वर्तते।

शिरोमुण्डनमात्रेण
हरिर्लभ्यो यदा नरैः।
भूयो मुण्डनमापन्नः
मेषो वैकुण्ठमेति किम्? ॥ ६१ ॥

केशमुण्डनमात्रेण कोऽपि गच्छेत् दिवं यदि।
मेषवत्तर्हि लोकोऽयं केशमुण्डलमाचरेत्॥

अत एव सर्वज्ञः पृच्छति यत्–

भस्मधारणमात्रेण स्वर्गलब्धिर्भवेद्यदि ।
भस्मशायी खरःपूर्वं स्वर्गगामीति कथ्यताम् ।।

यज्ञोपवीतमात्रेण स्वर्गगामी भवेद्यदि ।
सहस्रसूत्रसंयुक्तवस्त्रधारी नरःसदा ।। इति

या सज्जनैर्भुवनभूतिरनाद्रियेत
सा दुर्जनैरभिलषद्भिरुपास्यमाना ।।

यत्प्राणिनो जगति नाम वमन्ति सर्वं
खादन्ति तत्तु शुनकाः स्पृहया विनिन्द्यम् ।। ६२ ।।

साधुर्यमपि भौतिकभूतिगणं विरक्ततया त्यजति तमेव दुर्जनो भजत इति दृष्टान्तेनैकेन प्रकटयति। यद्भक्षयित्वा सर्वेऽपि जना वमन्तिः तदेव सारमेयानामतीवप्रियमिति अहो संसारविषयवासनायाः हेयता। हेयता दृष्टापि नरस्य विरागो न भवतीति पुंसः स्वबुद्धिरत्राविष्क्रियते निन्द्यते च।

साधुभंवेदपि च किं सुकुमारमाला–
धारी यदा विविधवेषधरो धारायाम् ।

हीनो गुणैर्यदि भवेत्तु निजान्तरङ्गे
वेषेण केवलमयं भविता न साधुः ।। ६३ ।।

'जटाभिस्तापस' इत्यादि प्रसिद्धवाक्येनैव सिद्धं यत् वेषधारणेन कोऽपि साधुर्न भवति। एतानेव धूर्तान् दृष्ट्वा चार्वाकमतावलम्बिनः धर्मकञ्चुकिनः उपरसन्ति यथा– बुद्धिपौरुषहीनानां जीविकेति बृहस्पतिः।" इति।

भिक्षो ! मांसनिषेणं प्रकुरुते किं तेन मद्यं विना
मद्यं चापि तव प्रियं प्रियमहो वाराङ्गनाभिःसह।
वारस्त्रीरतये कुतस्तव धनं चौरेण द्यूतेन वा
चौरद्यूतपरिश्रमोऽपि भवतः भ्रष्टस्य कान्या गतिः॥

इति भ्रष्टानामेव वेषधारणात्मको धर्मः जीविकायता इति वक्तुं शक्यते।

सर्पो यदाश्रयति चन्दनवृक्षमेषः
किं वा स्वभावविमलीकरणं तदस्य।
युक्तो यदा प्रतिकचं गरलेन भूयो:
भूयात्सुधारसमयो पयसा कथं सः ॥ ६७ ॥

चन्दनवृक्षे वसन्नपि सर्पः स्वभावसिद्धं विषं यथा न त्यजति, तथैव साधुसंसर्गेऽपि वर्तमानस्य दुर्जनस्य दुष्टतां दूरीकर्तुं न कोऽपि शक्नोति। एतदेव दृष्टान्तान्तरेण बसवेश्वरो विवृणोति यथा–

निम्बबीजं वपेद्यस्तु गुडपङ्कपयोभरे।
भूतले रक्षतीत्येव ह्याम्रवृक्षो कथं भवेत्॥ इति।

समासेन वक्तुं शक्यते यत् स्वभावो दुरतिक्रमः। इति।

पलाशो मलयसंगेन
यथा गन्धमयो भवेत्।
कीचकोऽन्तर्यदा रिक्तः
गन्धवान्न तथा भवेत् ॥ ६८॥

यथा मलयगिरिसमीपे वर्तमानः पलाशः सुगन्धामयो भवति, तथा कीचको न भवति, यतोऽन्तःरिक्तः स भवति। तद्वत्-कोऽपि गुणवान् सतां संसर्गफलं लभते नेतरः। कीटोऽपि सुमनः-संसर्गादारोहति सतां शिरः इति सत्सङ्गफलं प्राप्तुमपि योग्यता भवेत्।

आरोप्य विषवृक्षं तु
सुधासेचनतोऽपि किम्।
येऽपि भावा मनुष्येऽस्मिन्
आमृत्योः सुस्थिरा इमे ॥ ६९॥

पूर्ववत्द् (श्लेके ६७ तमे) अत्रापि स्वभावस्य दुरतिक्रमत्वं द्रष्टव्यम्। सदुपदेशपरिणामोऽसज्जने न लक्ष्यते। इदमप्यत्र स्मर्तव्यं यत्-

पयःपानं भुजङ्गानां
केवलं विषवर्धनम्। इति।

शिलामयी नौरतिभारपूर्णा
दृषद्गणेनापि विशिष्टभारा।
वराङ्ग एषोऽपि विषादिभारः
कथं तरेत्सागरमल्पबुद्धिः ॥ ७० ॥

यस्य समुद्रतरणमस्ति तस्य शीर्षस्योपरिस्थितः पूर्वजन्मकृतपापसम्पादितमहाभारः दिवानिशम्। यदुक्तं मयैव

विषयाहिविषैः पूर्णं शरीरं नौशिलामयी।
वासनाश्मगणेनेयं भारपूर्णा पुनःपुनः॥ इति।

इत्थं समुद्रतणस्यासंभवता कबीरदासेन रूपकाद्यलङ्कारद्वारा सुष्टु सूच्यते।

नास्तीह शब्दसदृशं द्रविणं विशिष्टं
शक्तिर्भवेद्यदि पुनःकथने नरस्य।
कल्पद्रुमो भवति शब्दगणप्रयोगे
दाता च वाञ्छितफलं सहजं सलीलम् ॥ ७१ ॥

रत्नादिकं बहुमूल्यं धनमिति व्यवहारे गण्यते, किन्तु वास्तवतोऽमूल्यता शब्दस्यैवेति कथितुं शक्यम्। अत एवाह सुभाषितकारः-

पृथिव्यां त्रीणि रत्नानि जलमन्नं सुभाषितम् ।
मूढैः पाषाणखण्डेषु रत्नसंज्ञा विधीयते ॥

अनयैव प्रणाल्या श्रीबसवेश्वरोऽपि शब्दमहिमानं वर्णयति

कल्याणीं यां वदति मनुजो भारतीं भर्गरागः
चेतोहारिण्यथ भवतु सा मौक्तिकानां सुमाला ॥
माणिक्याभा रुफटिकविमला संगमेशानुकूला
किं वाग्धीरस्तदनुसरणे रोचते ते विरागः ॥ इति

स एव वाग्ज्योतिर्लिङ्गमिति भणित्वा शब्दब्रह्मणः स्वरूपमाविष्करोति ।

शब्दःप्रयोज्यो मधुरोऽविकारी
त्याज्योऽभिमानः कृतजन्तुपीडः ।
मित्रं पुनः शात्रव एव तस्यां
वाचि स्थितौ तौ भवतः प्रयुक्तेः ॥ ७२ ॥

गीतायां प्रकारान्तरेण यदुक्तं तदप्यत्र सन्धीयताम् । आत्मैव ह्यात्मनो बन्धुरात्मैव रिपुरात्मनः ॥ इति (vi 5)

वाचः सम्यक्प्रयोग एव जगद्वशीकरणे समर्थ इति स्पष्टीक्रियते । श्रीबसवेश्वरोऽपि मधुरभाषणमहिमानमित्थं गायति–

'स्वागतं कुशलं ते किम् ?' कथ्यते भवता यदि ।
वैभवं नष्टतुल्यं किं ? चासनं गृह्यतामिति ।

भूमिर्नाशमायति ? सूनृतेन शिरःपुनः ।
दीयते यदि किंचिन्न, मधुरा वाङ्नैव वर्तते ? ॥

अत एव सुभाषितकारः सुष्टु भणति-

प्रियवाक्यप्रदानेन सर्वे तुष्यन्ति मानवाः ।
तस्यात् तदैव वक्तव्यं, वचने का दरिद्रता ॥

तन्त्रं न मन्त्रं न धरातलेऽस्मिन्
सर्वं मनोभ्रान्तिरिति प्रमाणे ।
शब्दस्य तत्त्वं न विना कुजन्मा
काको न हंसो भविता कदाचित् ॥ ७३ ॥

तत्त्वज्ञानं विना तन्त्रमन्त्रगणे क्रियमाणेऽपि वासनायुक्त-मनुजरूपी काकः कदापि परब्रह्मरूपो हंसो भवितुं न शक्नोति। तत्त्वज्ञानं तदनुसारवर्तनं च मोक्षप्राप्तेः हेतुर्भवतः इति मन्तव्यम् । केवलं 'अहं ब्रह्मास्मि' इति महावाक्यपठनेनैव मोक्षप्राप्तिर्न संभवति। अत एव स्वात्मारामेण हठप्रदीपिकायामुक्तं यत्-

न वेषधारणं सिद्धेः कारणं न च तत्कथा ।
क्रियैव कारणं सिद्धेः सत्यमेतन्न संशयः ॥ (i 66)

मुखेन केन याचेऽहं
भवन्तं लज्जितो यतः।
मदीयदुर्गुणन् सर्वान्
जानीते तान् प्रभो ! भवान् ॥ ७४ ॥

लौकिकान् सर्वजन्तून् वञ्चयितुमपि समर्थःसन् मानवः सर्वव्यापिनं सर्वशक्तं सर्वज्ञं च भगवन्तं वञ्चयितुमशक्त आत्मनोऽवगुणान् जानन् तदीयकृपायाचने लज्जितो भवति। भगवत्कृपापात्रत्वार्थमपि दुर्गुणत्यागोऽनिवार्यः। सत्येवं दम्भदर्पादियुतो नरः केन वा मुखेन भगवन्तं याचितुं प्रभवति।

कृतापराधो जननाद्यतोऽहं
शरीरमेतत् सकलं विकारि।
भवान् हि दाता जनतार्तिहारी
करोतु मे रक्षणमीश ! नित्यम् ॥ ७५ ॥

अर्थात् सर्वावगुणमयोऽपि मानवः भगवदनुग्रहयाचनं कृत्वैव पवित्रात्मा भवितुं शक्त इति कबीरदासो भणति। यतः विना शम्भोः प्रसादेन दुर्गुणत्यागमपि न साध्यम्। सन्दर्भेऽस्मिन् श्रीबसवोक्तं वचनं स्मरणीयम्–

क्षमाशीलो भवान् देव ! मदीयानन्तदोषता।
नाहमतापरंदोषी संगमेश्वररक्षितः ॥ इति।

किन्तु मनस्येतदवधार्यतां यत् दोषपूर्णोऽपि मानवः सर्वार्पणभावेन ईश्वरानुग्रहपात्रं भवति नान्यथेति ।

न विस्मर त्वं जगदीश्वरेमं
जनं जनैर्नित्यमुपास्यमान ।
असंख्यभक्ता ननु मादृशास्ते
न कोऽपि मे त्वत्सदृशोऽस्ति दानी ॥ ७६ ॥

मादृशाः कियन्तः सन्तीति गणनाप्यशक्या । किन्तु ईश्वरसदृशो न कोऽपि तारकः मम न विद्यते इति लोकव्यवहारमनुसृत्य कबीरदासो वदति । किन्तु सर्वज्ञत्वात् सर्वशक्तिमत्वाच्च सर्वव्यापनशीलो भगवान् सर्वेषा भक्तानां मध्ये वर्तमानं मामपि स्मरतीति मामनुकम्पापात्रं करोतीति विस्मृतं तेनेति मन्तव्यम् । अथवा भगवन्महिमानं स्वीयां च दीनतां दर्शयितुमेतद् उक्तमिति शक्यं वक्तुम् ।

किञ्चिन्न मे भूमितले यतस्ते
सर्वस्सदा वस्तुचयः प्रियोऽस्ति ।
देयं च ते तुभ्यमिति प्रजानन्
धन्यः कथं स्यामभिमानशाली ॥ ७७ ॥

'मा प्रयच्छेश्वरे धनम् ।' इति गीतायां यदुक्तं तदतीवयुक्तियुक्तमेव । तत्रैव भगवता सुष्टूक्तं यथा-

यद्यत् विभूतिमत्सत्त्वं
श्रीमदूर्जितमेव वा ।
तत्तदेवावगच्छ त्वं
मम तेजोंऽशसंभवम् ।। (xi 41)

एवं सति तस्यैव वस्तुचयं तदर्पणं कुर्वतो मनुजस्याभिमानः किमर्थं स्यादिति पृच्छति कबीरदासः । भगवदनुग्रहप्राप्तावभिमान एव महान्विघ्नः इति कथितुं शक्यते ।

आमन्त्रयत्यनुदिनं परमेश्वरो मां
गन्तुं न मे भवति शक्तिलवः समीपे ।
यावद्भवामि पतितो विमलस्य तस्य
पादाभिवन्दनमशक्ततरो हि कर्तुम् ॥ ७८ ॥

सच्चिदानन्दमयः परमात्मा सर्वथा विमलो वर्तत इति सर्ववेद्यम् । परन्तु सकलामयमयी जीवात्मरूपिणी महिला तस्य प्रियतमस्यान्तिकं गन्तुं कथं शक्तोति, यतः तस्य पादाभिवन्दमपि कर्तुं नास्याः शक्तिर्विद्यते । एवं सति तत्समागमः तेन सह कथं वा संभवति । इति आत्मापराधबोधः (Guilty conscience) तामनुदिनं पीडयति । अर्थात् जीवात्मनो विमलस्वरूपप्राप्त्यनन्तरमेव परमात्मना समागमः शक्यत इति साधु भणितम् ॥

गच्छेति गच्छेति वदन्ति सर्वे
आशंकितं चित्तमिदं मदीयम् ।

यावन्न जानाति तमादिदेवं
गम्यं कुतोऽशक्तिमता मयाद्य ॥ ७९ ॥

कतिपयसाधवो परमात्मनः समीपं गन्तुमुत्सुका भूत्वा 'गच्छेति' 'गच्छेति' परस्परं वदन्ति। यद्यपि नराणामेको गम्यः 'नराणामेको गम्यस्त्वमसि पयसामर्णव इव' (शिमस्तो 7 इति वचनानुसारेण) तथापि सम्यग्ज्ञानेन विना परमात्मनः स्वरूपमजान्तस्ते कुत्र गच्छन्तीति साधु शंकितं कबीरदासमनः। भगवत्प्राप्तिरसुलभेति सूच्यतेऽनेन।

मृत्युः प्रियो मे भंवित जगत्या-
मेकं यदा वारमयं भवेत्तु।
किं मृत्युनानेन यतो म्रियेत
नानैकवारं प्रतिवासरं च ॥ ८० ॥

संसारतापत्रयपीडितोऽयं नरः सदा वक्ति 'प्रियो नु मृत्युः।' ते भीरवो ये प्रतिवासरं च क्षणे क्षणे मृत्युगता भवन्ति ॥

क्षुद्रजनानां जननं मरणमिव केनापि नानुभूयते। सत्येवं, मरणापन्नो नरः न शोच्य एव। किन्तु पुनर्जायते। एवं जनन-मरणचक्रबध्दो भूत्वा निरन्तरं पीडांमनुभवति। एतदेव शुचः कारणं भवितुमर्हति। किन्तु साधुः ब्रह्मज्ञानसम्पन्नो भूत्वा विरागी सन् भौतिकं देहमेकवारमेव त्यक्त्वा मोक्षपदवीं लभते। अत

एवोक्तं यत्, शिवशरणानां महिमा मरणसमये दृश्यः इति ।

असौ न लभ्यते साधुः
येनोपदिश्यते मनः ।
सागरे भवरूपेऽस्मिन्
मज्जन्तं यश्च तारयेत् ॥ ८१ ॥

भवसागरे मज्जता मानवेन तारको न कोऽपि लभ्यते । चञ्चलस्य चित्तस्योपदेशदक्षोः भूतले कोऽपि गुरुः मोक्षमार्गदर्शको न सुलभं लभ्यते ।

यं चिन्तयामि सततं गुरुसार्वभौमं
लभ्यो न मे भुवि तु वीतमलो विरागी ।
ध्यायंस्तु निर्गुणहरिं विरलो हि साधुः
पूजारतिः सगुणदेवगणस्य लोके ॥ ८२ ॥

त्रिगुणातीतनिर्गुणब्रह्मोपसनारतः तत्त्ववेत्ता च लोकेऽस्मिन् विरल एव । विपरीते तु सगुणोपसनारतः त्रिगुणमयः लोकः बहुधा दृष्टिपथमायाति ।

पिबन् दुग्धं भवेत्सर्पो
विषपूर्णो भयङ्करः ।

यः स्वयं पिबति क्ष्वेडं
स महात्मा सुदुर्लभः ॥ ८३ ॥

'पयःपानं भुजङ्गानां केवलं विषवर्धन'मिति सुभाषितमनुसृत्य परापकारनिरता भुवि दुर्जना नैके सन्ति। किन्तु संसारतापत्रयरूपं पेरषां सहवसतां जनानां विषं पीत्वा तदेवामृतं कृत्वा तेभ्यो यच्छन्साधुः सुदुर्लभः एव इति सकललोकवेद्यमेव। साधवो नहि सर्वत्र इति सुभाषितमपि समर्थयतीदमेव।

यद्यत्किलाभीप्सितमस्ति रत्नं
सिन्धोस्तले मज्जनतो हि लभ्यः।
भीरुपुनः मज्जनवीतरागः
सिन्धोस्तटे व्यर्थमिह स्थितोऽस्मि ॥ ८४ ॥

अध्यात्मविद्यारूपिणि सागरे मज्जनं विषयवासनासक्तानां सुकुमारचित्तानां (काव्यनाटकादिपठनमात्रशक्तानां) असाध्यमेव भवति। मज्जनशक्तिर्यदि भवति, तदाभिलषितरत्नं (ईश्वरः) लभ्यमित्यत्र नास्ति संदेहलेशः। किन्तु भीरुलोकः सागरतट एवोपविष्टः सन् किमपि लब्धुमशक्तः इति यदुक्तं, तदतीव सुसंगतम्।

न दर्शनीयं भवता हि रत्नं
परीक्षको यत्र न स्वस्थचित्तः।

संवृत्य तत् स्वीयकरण्डकेऽस्मिन्
त्यजन् स्थलं दूरमिदं हि यातु ॥ ८५ ॥

विषयसुखरतानां दुर्जनानां हि मध्ये
परमपावनं तत् ब्रह्मसंज्ञं हि रत्नम् ।
सुजनवृन्द एषो दर्शयत्यात्मतुष्टः
भवति कोऽपि मूल्यमापने नात्र शक्तः ॥

लौकिकैर्मानवैरीश्वररूपिरत्नमूल्यं कदापि न ज्ञायते। परमात्मानुभूतिविषयकोपदेशस्तेषां कदापि न प्रियो भवति। अत एवैतेदुक्तं 'नलिकागतमपि कुटिलं न भवति सरलं शुनः पुच्छम्' इति ।

विदेशं चन्दने याते
पलाशभ्रान्तिरेव हि ।
दह्यते तद्यथा ह्यग्नौ
सुगन्धो जायते तथा ॥ ८६ ॥

साधुः साधारणलोक इव प्रतिभाति, यथा चन्दन-वृक्षः पलाशभ्रान्तिमज्ञानां जनयति। यथायथा चन्दनो ज्वलति तथा तथा सुगन्धो जायते। तद्वदेव साधोः परिचितिः क्रमेणैव भवति इति पद्येऽस्मिन् कविना सुष्टूक्तम् ।

ईशाभिधानं खलु शुद्धरत्नं
करण्डके तत्त्वभिरक्षणीयम् ।
न वा पुरं यत्र क्रयोऽस्य शक्यः
परीक्षकग्राहकयोरभावः ॥ ८७ ॥

पूर्ववदत्रापीश्वराभिधानं रत्नं कस्यापि न दर्शनीयम् यतस्तस्य रत्नस्य मूल्याङ्कनं कर्तुं शक्तः कोऽपि न विद्यते । तस्य च क्रयं कर्तुकामोऽपि न लभ्यते । अत एव करण्डके तन्निक्षिप्य रक्षेदिति कबीरदासः उपदिशति । अनयैव सरण्या स्वत्मारामोऽपि योगगुप्तिमुपदिशति यथा

गोपनीय प्रयत्नेन यथा रत्न करण्डकम् ।
कस्यचिन्नैव वक्तव्यं कुलस्त्रीसुरतं यथा ।।

हठप्रदीपिका, ।।। ४

रत्नानि चोपलगणा विविधा धरायाम्
मक्षिद्वयस्य पथि ते बहुधा पतन्ति ।
साधुः परीक्षणपरो विरलो हि लोके
रत्नोपलादिविषये कृतभेदबुद्धिः ॥ ८८ ॥

काकः कृष्णः पिकः कृष्णः कों भेदेश्चानयोरिह । प्राप्ते वसन्त समये काको काकः पिकः पिकः ॥ इति श्लोकानुसारेण दुर्जन सज्जनयोर्बाह्यभेदः नास्ति । किन्तु पिककाकभेददर्शी वसन्त इव तयोर्भेदज्ञाने समर्थः बहुविरल एव ।

रत्नं पतेद्यदपि राजपथे विशाले
केनापि नैव विदितं पतितं तथैव ।
याता विमूढमतयो; सुजनस्तदेव
चादाय याति निभृतं परितुष्टचित्ता ॥ ८९ ॥

धूलिधूसरितं रत्नं राजमार्गे निपातितम् ।
मन्दबुद्धिर्यथा त्यक्त्वा यात्यजानन् तमावृतः ॥
तथैवाविद्यया मूढाः मानवाः सर्ववासिनम् ।
न जानन्ति न वा यान्ति लभते कोऽपि सज्जनः ।

कलिर्युगोऽधर्मभवः प्रमादी
हितं श्रुणोत्येव न वोपदिष्टम् ।
येनोपदेशः क्रियते कदाचित्
विकल्पतो शत्रुमतिर्हि तस्मिन् ॥ ९० ॥

कलिर्युगोऽधर्मावतार इति साधुभिर्यदुक्तं तदतीव समंजसम् यस्य कस्यापि हितोपदेशः क्रियते स एव तस्य शत्रुः नापृष्टः कस्यचित् ब्रूयात् न केवलं एतदेव,किन्तु पृष्टोऽपि कस्यचित् सत्यं न ब्रूयादिति वक्तुं शक्यते : मनोहारिवाक्यश्रवणे दत्तचित्तो जनः हितश्रवणविमुखो भवतीति सर्वत्रानुभूयते । भारवि प्रोक्तं हितं मनोहारि च दुर्लभं वचः इति सुभाषितं स्मर्तव्यमत्र ।

यदेव सहजं प्राप्यं
गोक्षीरसदृशं हि तत् ।

याञ्चालभ्यं पयस्तुल्य
रक्ततुल्यं बलात्कृतम् ॥ ९१ ॥

बलात्कारलभ्येन वस्तुना सहज सुखं न लभ्यते प्राणिनाम् । किन्तु मनसा दीयमानेन यत्सुखं तत्सुखं भुवि ॥

महान् यदीशो बलवद्बिभेमि
अणुः स इत्याद्यनृतं वचस्तत् ।
न यो ममाक्षिद्वयमार्गयायी
कथं महेशं ननु वर्णयामि ॥ ९२ ॥

'अणोरणीयान् महितो महीयान्' इत्यौपनिषदिकं वाक्य शास्त्रविदां विदितमेव । सत्येवं स महान् लघुरिति व्यवहारो ऽजानता मादृशेन जनेन न कर्तव्यः इति कवीरदासोऽत्र स्पष्ट विवृणोति ।

'स भूमि विश्वतो वृत्वाऽत्यतिष्ठद् दशाङ्गुलम् ।' इति श्रुतिवचनानुसारेण सर्वत्र वर्तमानम् सर्वज्ञं सर्वशक्तं अव्यक्तं भगवन्तं वर्णयितु कथं कोऽपि शक्नोति ।

ईशस्वरूपं परमाद्भुतं तत्
तस्य स्तुतिं नैव करोतु साधुः ।
वेदे पुराणे च न तत्कथाऽस्ति
कस्यास्ति विश्वासलवो मदुक्तौ ॥ ९३ ॥

'त्रैगुण्यविषया वेदाः निःस्त्रैगुण्यो भवार्जुन' इति गीतायां यदुक्तं तेनेदं सिध्यति यद् वेदोऽपि भगवत्स्वरूपवर्णनाक्षमतो भवतीति। कुराणस्यापि वेदस्येव दशा वर्तते। स्वानुभवैकगम्यस्य परमात्मनो वर्णनं शब्दजालेन कर्तुं न कोऽपि शक्नोति। सर्वेऽपि श्रुतौ शास्त्रेष्वेव विश्वसन्ति। तद्विरुद्धप्रतिपादनं कुर्वतो मे वचनं न कोऽपि शृणोति। अत एव साधून् प्रति कबीरो ब्रवदति यदि भवता भगवत्स्वरूपज्ञानं कर्तव्यं तर्हि येषां केषामपि पुरतः (अधिकारमन्तरेण)तद्विषये न किंचिदपि वक्तव्यमिति। गीतायामपि प्रतिपादितमेतदेव इदं ते नातपस्काय नाभक्ताय कदाचन। न चाशुश्रूषवे वाच्यं न च मां योऽभ्यसूयति॥

(XVII 67)

वादे विवादेऽस्य महान् विरोधः
क्लेशोऽपि तावन्मनसो महान् स्यात्।
ज्ञातो हरिर्येन स साधुवर्गः
मौनी भवेद् वादविवाददूरः॥ ९४॥

'मूर्खं छन्दोऽनुवर्त्तनेति सुभाषितकारेण सुष्ठूक्तम्। ब्रह्मापि ज्ञानलवदुर्विदग्धनरं न रञ्जयति इति भर्तृहरिःसयुक्तिं ब्रवीति। येषां वादे विवादे जयः एवं परमलक्ष्यः येच ब्रह्मज्ञानं प्रति उपेक्षां कुर्वन्ति तैः सह वादविवादो न कार्यः। सर्वज्ञोऽपि सम्यग् वदति यथा

'शशको जयति श्वानं,
ब्रुवाणं सह पण्डितः।

न मूर्खैः कलहं कुर्यात्
सर्वज्ञः किल भाषते ॥

भगवन्नामस्मरणदत्तचित्तः साधुः कैरपि सह तद्विषयकां चर्चां न कुर्यादिति तात्पर्यम् ।

यस्माद्विभेति बहुधा जनता हि मृत्योः
तं वीक्ष्य वेपथुमयः सुखितः कबीरः ।
आनन्दनिर्भरमनाः भविता सहर्षं
मत्यन्तमेव सहजं मरणं प्रतीक्ष्यम् ॥ ९५ ॥

मरणात् लोकभीतिरिति सर्वेषामेवानुभवसिद्ध वचनम् । किन्त्वेक-दैव म्रियमाणः मोक्षकामः कबीरदासः मृत्युस्वागतं कुर्वन् तदर्थं सोत्सुकस्तिष्ठति । सदेहमुक्त्यै विघ्ना बहुलीभवन्ति अतो देह त्यागेन शाश्वती मुक्तिः प्रतीक्ष्यते साधुनेति मन्तव्यम् । सत्येवं मृत्योः का भीतिः ।

यदा शरीरं दहनप्रदग्धं
तदात्मरक्षा भवतीति चित्रम् ।
शरीरपुष्ट्यात्मविनाशशङ्का
सजीवमुक्तौयममत्ति शक्तम् ॥ ९६ ॥

तप आदिभिः शरीरतापेनैवात्मशुद्धिः. विषयवासनानुभवेन आत्मनो मालिन्यमिति सर्वेऽपि दार्शनिकाः ब्रुवन्ति । उक्तं च सर्वज्ञेन यत्

अन्तःकरणशुद्धिं वा
देहतापं बिनापि वा ।
भोगवान् स्वर्गगामी चेत्
तद् वेश्यावाटिका भवेत् इति ।
एवं यमनियमादिलब्धनैतिकबलद्वारा निर्मलान्तःकरणः साधुः योगशक्त्या जीवन्मुक्तो भवति । योगी कालमपि जित्वा ऽमरो भवतीति हठप्रदीपिकायामुक्त स्वात्मारामेण यथा

खण्डयित्वा कालदण्ड
ब्रह्माण्डे विचरन्ति ते ।। इति

(I 9)

निर्मलो यदि जायेत
ततः किं स्नानमिष्यते ।
मालिन्यनिर्मलत्वाभ्यां-
मतीतः साधुरुच्यते ।। ९७ ।।

देहशुद्धया किं प्रयोजनं यद्यात्मा मलिनो भवेत् । अत एव श्री बसवेश्वरो ब्रवीति-

बिलताडनतः सर्पः कथं वा मृतिमाप्नुयात् ।
तथोभिः देहतापेन निर्मलात्मा कथं भवेत् ।। इति ।

एवं सति त्रिगुणातीतब्रह्मप्राप्त्यर्थं देहनिर्मलत्वसाधनं व्रतादि निष्प्रयोजकमिति भावः । किन्तु दैहिकनैर्मल्यविषये उपेक्षा क्रियतामिति न भ्रमितव्यम् । तदपेक्षयात्मशुद्धिं प्रति साधुना विशिष्टः प्रयत्नः क्रियतामिति मन्तव्यम् ।

प्राप्तं मयेति भणितं हतबुद्धिरेषः
नष्टं ममेति गदिते जडधीस्ततः स्यात् ।
नाप्तं न नष्टमथवा भवितात्मतत्त्वं
पूर्णं भवेद् गुणगणैः रहितं पुराणम् ॥ ९८ ॥

अविनाशिब्रह्मांशभूतस्य जीवात्मनो विषये नष्टः प्राप्तः इत्यादि प्रयोगो ऽसाधुः । हतेषु देहेषु नात्मा विनाशमेति । उक्तं गीतायां यथा

न जायते म्रियते कदाचित्
नायं भूत्वा भविता न भूयः ।
अजो नित्यः शाश्वतोऽयं पुराणः
न हन्यते हन्यमाने शरीरे ॥ इति ।

औचित्यपूर्णो न किलास्ति जल्पः
मौनं न वातीवमपि प्रयोज्यम् ।
वर्षा यदा भूमिहिताय नैषा
तापो रवेस्तीक्ष्णतरोऽपि साधुः ॥ ९९ ॥

अति सर्वत्र वर्जयेत् इति नीत्या मनुष्य इह परत्र वा अति त्यजन् सुखं लभते । अति त्यजन् राजा कथं जनप्रियो भवतीति कालिदासेन सुष्टूक्तं अजवर्णने

न खरो न च भूयसा मृदुः पवमानः पृथिवीरुहानिव ।
स पुरस्कृतमध्यमक्रमो नमयामास नृपाननुद्धरन् ॥
(रघु VIII 9)

अतिवर्जनं योगसिद्धेः कारणमिति गीतायामप्युक्तं यथा—

युक्ताहारविहारस्य युक्तचेष्टस्य कर्मसु ।
युक्तस्वप्नावबोधस्य योगो भवति दुःखहा ॥ (VI 17)

यस्यामृतमदी वाणी कृतिर्विषमयी भवेत्
यद्यनुक्त्वा क्रियां कुर्यात् विषं भवति चामृतम् ॥ १०० ॥

कर्मण्येकः वचस्येकः मनुष्यः आषाढभूतिरिति मन्यते । तस्मिन् कस्यापि नास्ति विश्वासःअत एव मूखमधोःहृदयविषस्य दुष्यन्तस्य शकुन्तला निन्दां करोति । परोपदेशपाण्डित्यं यस्य स कदापि सज्जनो नैव भवति । अमृतमय्या वाण्या केषांचन सन्तोषः न कदापि जायेत । किन्तु परोपकारबुद्ध्या कर्म कुर्वन्नरो बहुतरं शस्यते लोके । योगसिद्धेः कारणमपि क्रियैव भवतीति हठ प्रदीपिकायां सुष्टु भणितं यथा :

क्रियायुक्तस्य सिद्धिःस्यात् अक्रियस्य कथं भवेत् (I 65)
क्रियैव कारणं सिद्धेः सत्यमेतन्न संशयः ।। (I 66)

यत्रापि कुत्रापि हरश्चं शब्दान्
काव्यं करोत्येव नरःक्षितौ यः ।
उच्छिष्टभोगेन सुतुष्टिमेति
प्राप्नोति सौख्यं परमं कथं ना ॥ १०१ ॥

अन्यमहाकवीनां काव्यग्रन्थेभ्यः शब्दार्थान्वावयानि चापि अपहरन् काव्यरचनानिपुणो नरः कविश्चोर इति जगति कुत्सितो भवति।

निपुणोऽपि कविश्चोरो विभाव्यते एव तदेतत् सर्वं उच्छिष्ट भोजनमिव निन्द्यं भवतीति स्वयंवेद्यम् ।

कविचोरानुद्दिश्य कविना वाणेनेदमुक्तं यत्

सन्ति श्वान इवासंख्या जातिभाजो गृहे गृहे ।
उत्पादका न बहवः कवयः शरभा इव । इति।

अत एव कविर्विहलणः स्वी काव्ये विक्रमाङ्कदेवचरिते कविचोरान् प्रति सवधानतया भवितुं कविबान्धवान् उपदिशति यथा

साहित्यपाथोनिधिमन्थनोत्क्ष
काव्यामृतं रक्षत हे कवीन्द्राः ।
यदस्य दैत्या इव लुण्ठनाय
काव्यार्थचोराः बहुलीभवन्ति ।। इति.

आत्मानुभूतिं विना सर्वमपि निरर्थकमिति कबीरदासः स्पष्टीकरोति ।

नीर न लभ्यं भवतोऽपि तावत्
क्षीर परेभ्यो विभजन् प्रयाति ।
चित्त तवाधीरमिहस्ति यावत्
आश्वासनं किं जगतो ददासि ।: १०२ ।।
मलितात्मा स्वयं भूत्वा परोपदेशपण्डितः ।
तस्यैषा कृता निन्दा कबीरेण महात्मना ।।

दृष्टान्तरूपेण अलभ्यनीरस्य परेभ्यः पयो ददतः विडम्बना कृतात्र ।

असारा केवला वाणी
क्रिया सारवती पुनः ।
तरत्येषो भवं धीर;
सबलक्रिययैव सः ॥ १०३ ॥

पूर्ववत् अत्रापि केवलवान क्रियाही क्लेशालस्यस्य निन्दा सूच्यते।

वचने बहवो वीराः
कर्मवीरास्तु दुर्लभाः ।
बहुभाषी क्रियाहीनः
दूरतत्यज्यतां बुधैः ॥ १०४ ॥

प्रजल्पन् तकर्महीनः सन् भवसागरं कथं तरतीति पृष्टे सति कबीर दासस्तन्निषेधं करोति । बहुभाषिणो क्रियाविहीनस्यानुसरणं न साधुना क्रियतामिति सूचितम् ।

मुखं भवेद्यस्य मधुप्रपूर्णं
हृदन्यथाभावमयं हि तस्य ।
परं स ईशोऽपि तथाप्रवीणः
यथा विजानाति नरस्य वृत्तम् ॥ १०५ ॥

वेदान्तप्रवचनं कुर्वन् यदि मनुजः क्रियादक्षो न भवति तस्य दम्भाचारयुतस्य परमात्मा सर्वमपि जानाति सर्वज्ञत्वात् सर्वशक्तिमत्त्वाच्च । अथवा परमात्मानं वञ्चयितुं निपुणोऽपि न समर्थ इति तात्पर्यम् ।

श्रोता तु सदने नास्ति
वक्तृवाणी वृथा भवेत् ।
वक्ता श्रोता यदैकत्र
वचनं सफलं तदा ॥ १०६ ॥

यदा क्वचित् श्रोतृलाभो न भवति, तदा वक्तृवचनं निरर्थकम् । वक्ता जिह्वया किञ्चिदपि ब्रवीति, किन्तु मनः यत्रापि कुत्रापि सचरति स श्रोतृहृदयाकर्षणं कर्तुं नश क्नोति । जयैकदृशा वादे क्रियमाणे हृदयसंवादोऽसंभवो भवति । अत एव कबीरदासेनोक्तं यत् यदा वक्ता, श्रोता चैकत्र भवतस्तदैव वचनसाफल्यं भवति रामायणे वाल्मीकिना वक्तृश्रोतृविशेषलाभासंभवत्वं दर्शितं यथा :

अप्रियस्य च दथ्यस्य वक्ता श्रोता च दुर्लभः । वादे वादे तत्त्वबोधः इत्यस्य वचनस्य सार्तक्यं तदैव भवति, यदा वक्ता श्रोता च साधुहृदयौ भवतः ।

इति सटीकं कबीरदासशतकं सम्पूर्णम् ॥

कबीरदोहाशतकम्

(हिन्दीमूलम्)

अछै पुरुष इक पेड है. निरजन वाकी डार ।
तिरदेवा सारवा भये. पात भया ससार ॥ १ ॥

जाकें मुँह माथा नहीं नाहीं रूप कुरूप ।
पुहुप बास तें पातरा, ऐसा तत्त्व अनूप ॥ २ ॥

चार भुजाके भजन मैं. भूलि परे सब संत ।
कबीरा सुमिरै तासु को, जाके भुजा अनन्त ॥ ३ ॥

सगुण कीं सेवा करो, निर्गुणका करु ज्ञान ।
निर्गुन सगुन के परे, तहँ हमारा ध्यान ॥ ४ ॥

जाको राखै साईंयाँ, मारि न सक्कै कोय ।
बाला न बाँका करि सकै, जो जग बैरी होय ॥ ५ ।

साँई मेरा बानिया, सहज करै व्योपार ।
बिन डाँडी बिन पालडे. तोलै सब संसार ॥ ६ ॥

तेरा साँई तुज्झ में. ज्यों पुहुपन में बास ।
कस्तूरी का मिरग ज्यों, फिर फिर ढूँढे घास ॥ ३ ॥

जा करन जग ढूँढिया, सो तो घट ही माहीं :
परदा दीया भरम का, तातें सूझे नाहिं ॥ ८ ॥

आदि नाम पारस अहै, मन है मैला लोह ।
परसत ही कंचन भया, छूटा बन्धन मोह ॥ ९ ॥

नाम रतन धन पाइकै, गाँठी बाँध न खोल ।
नाहीं पन नहिं पारखू, नहिं गाहक नहिं मोल ॥ १०॥

सभी रसायन हम करी, नहीं नाम सम कोय ।
रंचक घर मे संचरै, सब तन कंचन होय ॥ ११ ॥

सुपनेहुँ में वर्राईके, धोरवेहुँ निकरे नाम ।
वाके पग की पैंतरी, मेरे तन को चाम ॥ १२ ॥

लाली मेरे लाल की, जित देखौं तित लाल ।
लालीं देखन मैं गई, मैं भा हा गई लाल ॥ १३ ॥

सुन्न मंडल में घर किया, बाजै शब्द रसाल ।
रोम रोम दीपक भया, प्रगटे दीनदयाल ॥ १४ ॥

मेरी मिटी मुक्ता भया, पाया अगम निवास ।
अब मेरे दूजा नहीं, एक तुम्हारी आस ॥ १५ ॥

आतम अनुभव ज्ञान की, जो कोई पूछै बात ।
सो गूँगा गुड़ खाइकै, कहै कौन सुख स्वाद ॥ १६ ॥

लिखा-लिखी की है नहीं, देखा देखी बात ।
दुलहा दुलहिन मिल गये, फीकी पडी बरात ॥ १७ ॥

औगुन को तो ना गहै, गुनही को लै बीन ।
घट घट महँके मधुप ज्यों, परमातम लै चीन ॥ १८ ॥

छीर रूप सत नाम है, नीर रूप व्यवहार ।
हंस रूप कोई साध है, तत का छाननहार ॥ १९ ॥

दुःख में सुमिरन सब करै, सुख में करें न कोय ।
जो सुख में सुमिरन करै, तो दुःख काहे होय ॥ २० ॥

माला तो कर में फिरै, जीभ फिरै मुख माहिं ।
मनुवाँ तो दहुँ दिसि फिरै, यह तो सुमिरन नाहिं ॥२१॥

साधू गाँठ न बाँधई, उदर समाता लेय ।
आगे पीछे हरि खडे, जब मांगे तब देय ॥ २२ ॥

साँई इतना दीजिये, जामे कुटुंब समाय ।
मैं भी भूखा ना रहुँ, साध न भूखा जाय ॥ २३ ॥

पढा सुना सीखा सभी, मिटा न संशय मूल ।
कह कबीर कासों कहूँ, यह सब दुःखका मूल ॥ २४ ॥

सत्त नाम कडुवा लगै, मीठा लागै दाम ।
दुविधा में दोऊ गए, माया मिली न राम ॥ २५ ॥

जब लग नाता जगत का, तब लग भक्ति न होय ।
नाता तोडै हरि भजै, भक्त कहावै सोय ॥ २६ ॥

कामी क्रोधी लालची, इन तें भक्ति न होय ।
भक्ति करै कोई सूरमा, जाति बरन कुल खोय ॥२७॥

जल ज्यों प्यारा माछरी, लोभी प्यारा दाम ।
माता प्यारा बालका, भक्त पियारा नाम ॥२८॥

जब लगी भक्ति सकाम है, तब लगी निष्फल सेव ।
कह कबीर वह क्यों मिलै, निःकामी निज देव ॥२९॥

और कर्म सब कर्म है, भक्ति कर्म निष्कर्म ।
कहै कबीर पुकारि कै, भक्ति करो तजि धर्म ॥३०॥

प्रेम न बाडी ऊपजै, प्रेम न हाट बिकाय ।
राजा परजा जेही रुचै, सीस देह लै जाय ॥३१॥

जा घट प्रेम न संचरै, सो घट जान मसान ।
जैसे खाल लोहार की, साँस लेत बिनु प्रान ॥३२॥

यह तत वह तत एक है, एक प्राण दुइ गात ।
अपने जिय से जानिए, मेरे जिय की बात ॥३३॥

पीया चाहे प्रेम रस, राखा चाहें मान ।
एक म्यान में दो खडग, देखा, सुना न कान ॥६४॥

जोई मिलै सो प्रीति में, और मिलै सब कोय ।
मन सो मनसा ना मिलै, देह मिले का होय ॥ ३५ ॥

हरि से जनि तू हेत कर, कर हरिजन से हेत ।
माल मुलुक हरि देत हैं, हरिजन हरि ही देत ॥६६॥

जल में बस कमोदिनी, चन्दा बसै अकास ।
जो है जाको भावता, सो ताही के पास ॥ ३७ ॥

प्रीतम को पतियाँ लिखूँ, जोहुँ होय बिदेस ।
तन में मनमें नैन में, ताको कहा संदेस ॥ ३८ ॥

बिरहिन देय संदेसरा, सुनो हमारे पीव ।
जल बिन मच्छी क्यों जिए, पानी में का जीव ॥३९॥

कै बिरहिन को मीच दे, कै आपा दिखलाय ।
आठ पहर का दाझना, मो पै सहा न जाय ॥ ४० ॥

कबीरा बैद बुलाइया, पकरि के देखी बाँहि ।
बैद न बेदन जानई, करक कलेजे माहिं ॥ ४१ ॥

पतिबरता मैली भली, काली कुचित कुरूप ।
पतिबरता के रूप पर, वारों कोटि सरूप ॥ ४२ ॥

साध बडे परमारथी, धन ज्यों बरसें आय ।
तपन बुझावैं और की, अपना पारस लाय ॥ ४३ ॥

सिहों के नहीं लेहँडे, हंसों की नहीं पांत ।
लालों की नहीं बोरियाँ, साधु न चलैं जमात ॥ ४४ ॥

गाँठी दाम न बाँधई, नहिं नारीं सों नेह ।
कह कबीर ता साध की, हम चरनन की खेह ॥ ४५ ॥

निराकार की आरसी, साधो ही की देह ।
लखा जो चाहै अलख को, इनहीं में लखि लेह ॥ ४६ ॥

नहीं शीतल है चन्द्रमा, हिम नहिं शीतल होय ।
कबीरा शीतल संतजन, नाम सनेही सोय ॥ ४७ ॥

जाति न पूछो साधु की, पूछ लीजिये ज्ञान ।
मोल करो तलवार का, पड़ा रहन दो म्यान ॥ ४८ ॥

साधु समुंदर जानिए, माहीं रतन भराय ।
मंद भाग मूठी भरै, कर ककर चढि जाय ॥ ४९ ॥

हरि सेती हरिजन बडे, समझि देखु मन माहिं :
कह कबीर जग हरि विखे, जो हरि हरिजन माहिं ॥५०॥

सोना सज्जन साधु जन, टूटि जुरै सौ बार ।
दुर्जन कुंभ कुम्हार के, एकै धका दरार ॥ ५१ ॥

कबीरा संगत साधु की, ज्यों गंधी का वास ।
जो कछु गंधी दे नही, तौ भि बांस सुवास ॥ ५२ ॥

कबीरा मन पंछी भया, भावै तहवाँ जाय ।
जो जैसी संगती करै, सो तैसा फल पाय ॥ ५३ ॥

गरु गोविंद दोऊ खडे, काके लागौं पाँय ।
बलिहारी गुरु आपने, गोविन्द दियो बताय ॥ ५४ ॥

सब धरती कागद अरूँ, लेखनी सब वनराय ।
सात समुँद की मसि करुँ, गुरु गुन लिखा न जाय ::५५::

गुरु पारस गुरु परस है, चन्दन बास सुबास ।
सतगुरु पारस जीवको, दीन्हों मुक्ति निवास :: ५६ ::

यह तन बिष की बेलरी, गुरु अमृत की खान ।
सीस दिये जो गुरु मिलें, तो भी सस्ता जान :: ५७ ::

गरु मिला ना सिष मिला, लालन खेलां दाँव ।
दोऊ बूढे धार में चढि पाथर की नाव :: ५८ ::

बन्धे को बन्धा मिलै, छूटै कौन उपाय ।
कर सेवा निरबन्ध की, पल में लेत छुड़ाय :: ५९ ::

चाल बकुल की चलत है, बहुरि कहावैं हस ।
ते मुक्ता कैसे चुगैं, परैं काल के पाँस :: ६० ::

मूंडमुँडाए हरि मिलै, सब कोइ लेइ मुँड़ाय ।
बार बार के मूंडने, मेड़ न बैकुंठ जाय :: ६१ ::

जो बिभूति साधुन तजी, तेहि बिभूति लपटाय ।
जौन बवन करि डारिया. स्वान स्वाद करि खाय ::६२::

साधू भया तो क्या भया, माला पहिरी चार ।
बाहर भस बनाइया, भीतर भरी भँगार :: ६३ ::

नाम न रटा तो क्या हुवा, तो अन्तर है हेत ।
पतिवरता पति को भजै, मुख से नाम न लेत ॥ ६४ ॥

जो यह एक न जानिया, बहु जाने का होय ।
एक तें सब होत हैं, सब तें एक न होय ॥ ६५ ॥

सेज बिछावै सुन्दरी अन्दर परदा होय ।
तन सौंपे मन दे नहीं, सदासुहागिन सोय ॥ ६६ ॥

चन्दन सर्प लपेटिया, चन्दन काह कराय ।
रोम रोम विष भीनिया, अमृत कहाँ समाय ॥ ६७ ॥

मलयागिरि के बास तें, बेधा ढाक पलास ।
बेना कबहु न बेधिया, जुग जुग रहिया पास ॥ ६८ ॥

जहर जिमीं दै रोपिया, अमी सींचै सौ बार ।
कबीरा खलकै ना तजै, जामें जौन बिचार ॥ ६९ ॥

लोहे केरी नावरी, पाहन गरुआ भार ।
सिर में बिष की मोटरी, उतरन चाहै पार ॥ ७० ॥

सब्द बराबर धन नहीं, जो कोइ जानै बोल ।
हीरा तो दामों मिलै, सब्दहीं मोल न तोल ॥ ७१ ॥

सीतल सब्द उचारिये, अहम्आनिए नाहीं ।
तेरा प्रीतम तुज्झ में, सत्रू भी तुझ माहीं ॥ ७२ ॥

जंत्र मंत्र सब झूठ है, मत भरमो जग कोय ।
सार सब्द जाने विना, कागा हस न होय ।। ७३ ।।

क्या मुख लै बिनती करौं, लाज आवत है मोहि ।
तुम देखत अवगुन करैं, कैसे भावौं तोहि ।। ७४ ।।

मैं अपराधी जनम का, नख सिख भरा बिकार ।
तुम दाता दुखभंजना, मेरी करो सम्हार ।। ७५ ।।

साहेब तुम जनि बीसरो, लाख लोग लगि जाहिं ।
हमसे तुमसे बहुत है, तुम सम हमरे नाहिं ।। ७६ ।।

मेरा मुझ में कुछ नहीं, जो कुछ हैं सो तोर ।
तेरा तुझको सौंपते, क्या लागत हैं मोर ।। ७७ ।।

यार बुलावैं भाव सों, मोपै गया न जाय ।
धन मैली पिउ ऊजला, लागि न सक्कों पाय ।। ७८ ।।

चलन चलन सब कोई कहै, मोहि अँदेसा और ।
साहेब सों परिचय नहीं, पहुँचैंगे केहि ठौर ।। ७९ ।।

मरिये तो मरि जाइए, छूटि परै जंजार ।
ऐसा मरना को मरै, दिन में सौ सौ बार ।। ८० ।।

ऐसा कोऊ ना मिला, हमको दे उपदेस ।
भव सागर में डूबता, कर गहि काढै केस ।। ८१ ।।

जैसा ढूँढत मैं फिरौ, तैसा मिला न कोय ।
तनवेता त्रिगुन रहित, निरगुन से रत होय :: ८२ ::

सर्पहि दूध पिलाइए, सोई विष व्है जाय ।
ऐसा कोई ना मिला, आपे ही विष खाय :: ८३ ::

जिन ढूँढा तिन पाइयाँ, गहरे पानी पैठि ।
मैं बपुरा डूबन डरा, रहा किनारे बैठि :: ८४ ::

हीरा तहाँ न खोलिए, जहँ खोटी है हाट ।
कसकर बाँधो गाठरी, उठकर चालो बाट :: ८५ ::

चंदन गया बिदेसडे, सब कोइ कहैं पलास ।
ज्यों ज्यों चूल्हे झोंकिया, त्यों त्यों अधकी बास :: ८६ ::

नाम रतन धन पाइकै, गाँठी बाँध न खोल ।
नहीं पटन नहिं पारखी, नहिं गाहक नहिं मोल ::८७::

नग परवान जग सकल है, लखि आवै सब कोइ ।
नग ते उत्तम पारखी, जग में बिरला कोइ :: ८८ ::

हीरा परा बजार में, रहा छांर लपटाय ।
बहुतक मूरख चलि गए, पारखि लिया उठाय ::८९::

कलि खोटा जग आँधरा, शब्द न मानै कोइ ।
जाहि कहैं हित आपना, सो उठि बैरी होय :: ९०::

सहज मिलै सो दूध सम, माँगा मिलै सो पानि ।
कह कबीर वह रक्त सम, जामें ऐंचातानि :: ९१ ::

भारी कहूँ तो बहु डरूँ, हलका कहूँ तो झूठ ।
मैं का जानूँ पीव को, नैना कछू न दीठ :: ९२ ::

ऐसो अदभुत मत कथो, कथो तो धरो छिपाय ।
वेद कुराना ना लिखी, कहूँ तो को पतियाय ::९३::

वाद विवादे विष घना, बोले बहुत उपाध ।
मौन गहे सबकी सहे, सुमिरै नाम अगाध :: ९४ ::

जा मरने से जग डरै, मेरे मन आनन्द ।
जब मरिहौं कब पाइहौं, पूरन परमानन्द :: ९५ ::

घर जारे घर ऊबरे, घर राखे घर जाय ।
एक अचभा देखिया, मुआ काल को खाय ::९६::

निरमल भया तो क्या भया, निरमल माँगै ठौर ।
मल निरमल से रहित है, ते साधू कोई और ::९७::

पाया कहैं ते बावरे, खोया कहैं ते क्रूर ।
पाया खोया कछु नहीं, ज्यों को त्यों भरपूर ::९८::

अति का भला न बोलना, अति का भला न चूप ।
अति का भला न बरसना, अति की भली न धूप ::९९::

कथनी मीठी खाँड सी, करनी विष की लोय।
कथनी तजि करनी करै, विष से अमृत होय ।।१००।।

लाया साखि बनाय कर, इत उत अच्छर काट ।
कह कबीर कब लग जिए, जूठी पत्तल चाट ।।१०१।।

पानी मिलै न आप को, औरन बकसत छीर ।
आप मन निसचल नहीं, और बँधावत धीर ।।१०२।।

कथनी थोथी जगत में, करनी उत्तम सार ।
कह कबीर करनी सबल, उतरै भौजल पार ।।१०३।।

कहता तो बहुता मिला, गहता मिला न कोइ ।
सो कहता बहि जान दे, जो नहीं गहता होइ ।।१०४।।

मुख की मीठी जो कहैं, हृदया है मति आन ।
कह कबीर तेहि लोभ सों, रामौ बडो सयान ।।१०५।।

श्रोता तो घर ही नहीं, वक्ता वदै सो वाद ।
श्रोता वक्ता एक घर, तब कथनी को स्वाद ।।१०६।।

——

अनुबन्धः

प्रमादवशात् (६४-६६) पद्यत्रयं यथा स्थानं न मुद्रितम्। अत्र तन्मुद्रितम्, यदर्थं सहृदयानां क्षमाप्रार्थी लेखकः

ईशाभिधानपठनं विफलं हि तावत्
हर्षानुरागरहितो मनुजोऽपि यावत्।
भर्तुः प्रिया पतिहितैकरताऽभिधानं
गृह्णाति नैव हृदये स्मरण तदीयम् ॥ ६४ ॥

एकं न वेत्ति मनुजो यदि मन्दबुद्धिः
जानन् पुनः किमितरत् कुरुते ऽल्पबुद्धिः।
एकं तदेव बहु साधयतीह् यद्वत्
तद्वद् बहु प्रभवति प्रथितं तदेकम् ॥ ६५ ॥

शय्यालङ्करणे रक्ता
विरक्ता हृदये तु या।
देहार्पणकृतौ दक्षा
विमुखात्मसमर्पणे ॥ ६६ ॥

श्लोकानुक्रमणिका

	श्लोकसंख्या		श्लोक संख्या
अन्वेषणे यस्य	८	गच्छेति गच्छेति	०९
असारा केवलं	१०३	गतिर्बकस्येव	६०
असौ न लभ्यते	८१	गुणान्वितं	४
अस्मच्छरीराणि	५७	गुरु; स्पर्शमणि।	५६
आत्मानुभूति	१६	गोविन्दश्च	५४
आमन्त्रयत्यं	७७	चदुर्मुखध्यान	३
आरोप्य विष	६९	चन्द्रो न शीत	४७
इयं कबीरोक्ति	३५	चन्द्रस्य तारा	३७
ईशस्तुतिः	२५	जगता यदि	२६
ईशस्वरूपं	९३	तत्त्वद्वयं जगति	३३
ईशाभिधानं	८७	तदीश्वराख्या	१९
इशाभिधानं	३४	तन्त्रं न मन्त्रं	७३
एकं न वेत्ति	६५	दुर्गुणं नैव	१८
औचित्यपूर्णो	९९	धनार्जनं नैव	२२
कबीरदासो	४१	धनार्जनं नैव	४५
कलिर्युगोऽ	९०	न तस्य वक्त्रं	२
किञ्चिन्न मे	७७	न तं जनः कोऽपि	५
कृतापराधो	७५	न त्वं हरि	३६

श्लोक संख्यां		श्लोक संख्या	
न दर्शनीयं	८५	प्रीत्या यदा	२५
न जायते देव	३९	फलाभिलाषि	३९
न लेखनेनापि	१७	बद्धः स्वयं	५९
न वा गुरुं	५८	भवेदसौ कर्म०	३०
न विस्मर त्वं	७६	मलिना रूप	४२
नष्ट ममत्वं	१५	महान् यदीशो	९२
नामस्ति रत्नं	१०	मूखेन केन	६४
नामास्य देवस्य	९	मुखं न भवेदस्य	१०५
नास्तीह शब्द	७१	मृत्युः प्रियो मे	८०
निरञ्जनब्रह्म	४६	यत्रापि कुत्रापि	१०१
निर्मलो यदि	९७	यथा जल	२८
नीरं न लभ्यं	१०२	यथा सुगन्धा	७
पञ्चानना न	४४	यद्दा शरीरं	९६
पत्रं तु भूमि	५५	यदेव सहजं	९१
पत्रं लिखामि	३८	यद्यत्किला०	८४
पलाशो मलय	६८	यस्माद् विभेति	९५
पश्यामि यत्रापि	१३	यस्मिन् घटे	३२
पिबन् दुग्धं	८३	यस्यामृत०	१००
पेयस्त्वया	३४	यस्यास्ति कामो	२७
प्रष्टव्या साधु	४८	या सज्जनैः	६२
प्राप्तं मयेति	१९	यं चिन्तयामि	८२

	श्लोक संख्या		श्लोक संख्या
रत्नानि चोप०	४८	शिलामयी	७०
रत्नं पतेद्यद०	८९	शुचि समरन्त्यंव	१०
रम्याक्षमाला	२१	श्रोता तु	१०६
रसायने दत्त	११	सनातनं	१
वचने ववो	१०४	सर्पो यदा	६७
वणिज्वरोऽयं	६	साधुः परोपक०	४३
वसन् सदा	१४	साधुर्भवेदपि	६३
वादे विवादे	९४	साधुः समुद्र०	४९
विदेशं चन्दने	५	साधुः सुवर्ण०	५१
वियुक्ता जीवि	३९	सङ्गः सतां	५२
शब्दः प्रयोज्यो	७२	स्वपन् स्मरेद्य०	१२
शय्यालङ्कृत	६६	स्वामिन् प्रयच्छ	२३
शास्त्राणां पठनं	२४	स्वामिन् वियोग	४०
शिरो मुण्डन०	६१	हरि ईरिजना०	५०

दोहानुक्रमणिका

	दोहा संख्या		दोहा संख्या
अछैं पुरुष	१	गाँठी दाम	४५
अति का भला	९९	गुरुगोविन्द	५४
आतम अनुं	१६	गुरु पारस	५६
आदि नाम	९	गुरु मिला	५८
एसा कोऊ	८१	घर जारे	५६
ऐसो अद्भुत	९३	चलन चलन	७९
औगुन को	१८	चन्दन गया	८६
और कर्म	३०	चन्दन सर्प	६७
कथनी थाथी	१०३	चार भुजाके	३
कथनी मीठी	१००	चाल बकुल	६०
कबिरा मन	५३	छीर रूप	१९
कबीरा वैद	४१	जन्त्र मन्त्र	७३
कबिरा संगत	५२	जब लग	२६
कलि खोटा	९०	जब लगि	२९
कहता तो	१०४	जल ज्यों	२८
कामीं क्रोधी	२७	जलमे बसे	३७
कै विरहिन	४०	जहर जिमी	६९
क्या मुखलै	७४	जा कारन	८

	दोहा संख्या		दोहा संख्या
जा के मुंह	२	पीया चाहै	३४
जाको राखै	५	प्रीतम को	३८
जाति न पूछो	४८	प्रेम न बाडी	३१
जा घट प्रेम	३२	बन्धे को	५९
जा मरने से	९५	भारी कहूं	९२
जिन ढूंढा	८४	मरिये तो	८०
जैसा ढूंढत	८२	मलयागिरि	६८
जोई मिलै	३५	माला तो	२१
जो यह एक	६५	मुख की मीठी	१०५
जो विभूति	६२	मुंड मुंडाए	६१
तेरा साँई	७	मेरा मुझमें	७७
दुख में	२०	मेरी मिटी	१५
तग परवान	८८	मैं अपराधी	७५
नहि शीतल	४७	यहतत	३३
नाम न रटा	३४	यह तन विष	५७
साम रतन	८७	यार बुलावै	७८
निरमल भया	९७	रामरतन	१०
निराकार की	४६	लाया साखि	१०१
पढा सुना	२४	लाली मेरे	१३
पतिबरता	४२	लिखा लिखी	१७
पानी मिलै न	१०२	लोहे केरी	७०
पाया कहें	९८	वाद विवादे	९४

	दोहा संख्या		दोहा संख्या
विरहिन देय	३९	साधू भया तो	६३
सगुण की सेवा	४	साहेब तुम	७६
श्रोता तो	१०६	सिहों के	४४
सत्त नाम	२५	सीतल सब्द	७२
सब धरती	५५	सुन्नमँडलमें	१४
सभी रसायन	११	सुपने हूँ में	१२
सर्प हि दूध	८३	सेजबिछावै	६६
सहज मिलै	९१	सोना सज्जन	५१
साँई इतना	२३	सब्द बरावर	७१
माँई मेरा	६	हार से ती	५०
साध बडे	४३	हरि सो तू	३६
साधु समुन्दर	४९	हीरा तहाँ न	८५
साधू गाँठ	२२	हीरा परा	८९

——

मुरुसाविरमठीय-श्रीमद्जगद्गुरु-गङ्गाधरधर्मप्रचारक
मण्डलद्वारा प्रकाशिताः संस्कृतग्रन्थाः :-

१ वीरशैवानन्दचन्द्रिका
२ विशेषार्थप्रकाशिका
३ तन्त्रसंग्रहः
४ शिवमन्त्रजपविधिः
५ संस्कृतप्रवेशः
६ सस्कृतव्याकरणदर्पणः
७ संस्कृतमार्गदर्शः
८ वीरशैवसदाचारसंग्रहः
९ श्रीमत्कुमारगीता
१० हानगल्ल श्रीकुमारस्वमिनः जीवनचरितम्
११ शिवाद्यष्टकस्तोत्रमणिमाला
१२ करडीशचरितामृतचम्पूप्रबन्धः
१३ मलहणस्तोत्रम्
१४ चित्तरगि विजयमहान्तेशचम्पू
१५ सटीकं कबीरदास शतकम्